१०७
/९

अथ
न्यायलीलावतीटीका

ग्रन्थनामः	~~"बृहदारण्यभाष्यव्याख्या"~~	
व्याख्याकर्तृनामः	~~"भगवदानन्दः"~~ वर्धमानः	
विषयः	~~अद्वैतवेदान्तः~~ न्यायः	

107/9

Nyayalilavatytika

१०७/९

स्वाधिकरणासमय आगमाभावाधिकरणक्षणा इतिलै सौतिकत्वं।
स्वाधेयपदार्थआगभावानाधारःसमयः।

१०७
९

न्यायलीलावती टीका

न्यायशास्त्र मू



107
9



107
9

न्या॰ बो॰

१ श्रीगणेशाय नमः॥ एकत्र शूलमपरत्र विषाणमुग्रमन्यत्र कृत्तिरपरत्र च पीतवासः॥ तत्र पातु वपुषोर्द्ध[illegible]
कलाकिरीटनिषिक्तकैरवहरो मम वांछितानि।१। न्यायांभोजपतंगाय मीमांसापारदृश्वने गंगेश्वराय गुरवे
पित्रेऽत्र भवते नमः॥२॥ विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं विघ्नविघातकं नमस्कारं निबध्नाति॥ न्यायइति॥
यद्यपि पुरुषाणामुत्तम इत्यत्र न निर्धारणे इति षष्ठीसमासनिषेधस्यावश्यं पुरुषश्चासावुत्तमश्चेति कर्मधा
रये विशेषणत्वादुत्तमपदस्य पूर्वनिपातापत्तिः॥ पुरुषेषूत्तम इति निर्धारणसप्तमीसमासेन निर्धारणे
त्यस्य वैयर्थ्यं संगः॥ तत्र षष्ठीसमस्यारत्नेशा[illegible]॥ तथापि निर्धारणमेव नास्तीति षष्ठीसमास एवानरोपि ॥१॥
तत्रियंगुरूतम इत्यादावपि वसमुदायापेक्षया जातिगुणक्रियाभिर्निरेकदेशस्य पृथक्करणात्। यद्वा

पृ२

पंचमीतियोगविनागादत्रसमासः॥ पुरुषेष्वुत्तमः॥ पुरुषोत्तमः॥ यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥ अतो
स्मिंल्लोके वेदेच प्रथितः पुरुषोत्तमइतिगीतासुभगवद्वचनात् तस्मैपुरुषोत्तमायनमः॥ पुरुषोत्तमत्वमेवनम
स्कार्यताप्रयोजकरूपं। अन्यदप्याहयोनायकः चतुर्दशजगत्कार्यजातंसृजतिजनयति। ततःसृष्टेरनंतरं अवतिअनि
ष्टनिहत्तिपालिकरोति। एकपुत्रयाप्रीतिरस्तु जिघांसातयापरं मांदुःखात्सहरत्विति निवृत्तिसुखंदुःखाभावंवादयतिस
त्यवनयोः कार्यमात्रेसंभवेपिपरमनिर्वृत्तिरसंभवादं जगत्संसारिमात्रंसहगोगंतुकः [illegible] त्वजन्या [illegible] दोषोत्तमा
रकालानवच्छिन्नायाहरूपानिरुपाधिपरदुःखप्रहाणेच्छातयानुबंधेनपोनः पुण्येनसृष्टिस्थितिसंहारकरणाय
ब्रह्मास्मि तत्स्वरूपावस्थाविष्णुरिवाक्लिकास्तनवोयेन। अथयद्ग्रंथकर्त्तासपितृपुरुषोत्तमनामकेनमस्कार

चउ आउ वउ

रे निबद्धः॥ तत्र सहजादीर्वा गुर्वीकृपा तदनुसंबंधेन लब्धावत्रीकृतास्मितत्वतनवो ब्रह्मादयो येनेत्यर्थः॥
अन्यच्च तुल्यमेवाप्येन्नावस्त्रद्वन्त्यंगम्य निषेधमाहाद्व्यमिति॥ न्यायसमस्तरूपोपेतं वाक्यं स एवास्य शास्त्रस्य
लीलातद्वतीति ग्रंथनाम तत्राशीपदेनोकरिष्ठिका॥ सा सतां प्रीतये अस्तु। अथवांगयष्ठत्वेय लीलावती
२ नयेतिध नियते प्राप्यते कांत चेतोऽनेनेन्यायः॥ तादृशीयाल्लीलातद्वती सा सतः प्रियस्य प्रीतये अस्तु भवति। यत्रगं
पप्रियायां च द्रव्येनाकुलं न सदोषं व्याख्यानमेकत्र अन्यत्र वचनं न सदोषं। एकत्र गुणगणो रूपादिसंबंधः
उज्वलः प्रमापितः॥ अन्यत्र गुणानां शीलादीनां गुणादोषासंतिन्नः॥ एकत्र कर्मगतक्षेपणादि अधिकं २॥
द्रव्यादिन्यः पृथककृत्वा घातप्रशंसाविषयः॥ न्यै अन्यत्र कर्मगृहव्यापारः॥ अधिकमिति क्रियाविशेषणं।

र्ष

एकत्र जातिः पदार्थविशेषं विप्लुतिं सांकर्यं न गता। अन्यत्र जातिः ब्राह्मणत्वं सती चाद्विप्लुतिं परपुरुषसंस
र्गात्सदोषत्वं न गता। एकत्र विशेषाणां नित्यानां स्थितिर्व्यवस्था रूला ध्यात्मज्ञा सा विशेषः। अन्यत्र विशेषस्य
कर्मस्य स्थितिः तादृशी। एकत्र गुणादिनिर्गुणपादेः सहजः संबंधः समवायो ज्ञप्रतिपाद्यत्वे नास्ति। अन्यत्र
गुणगुणोः संबंधः सहजोऽकृत्रिमस्वाभाविकः श्रवणादनुपश्चादीक्षामननहेतुर्न्यायः स एव नीय
तेऽनेनेति व्युत्पत्त्या नयः शास्त्रं तस्य वेश्म तस्य न्यायाधारत्वात्। तस्य कर्म परिकर्म परदूषणनिरासादि
तत्र कुशलादक्षा। अन्यत्र आन्वीक्षाविद्या नयो नीतिः वेश्मकर्म गृहव्यापारः अत्र कुशला कौशलवती
॥ नय इत्यत्र श्लिष्टोऽनुप्रासगर्भ इति
घं त्रि

श्र

ली०प०

प्रामेकत्वत्तुरोबेहलमिति बाहुलकादेरङ् । इह पदार्थानां सामान्यतः प्रयोजनसंबंधेवगते केते इ
ति विशेषाकांक्षायां द्रव्यगुणेत्यादि तद्विशेषाभिधानमेतावन्त एव पदार्था इत्यवधारणपरविभागात्मकं
३ सामान्यजिज्ञासायां तद्विशेषवचनस्येतरव्यवच्छेदपरत्वेन व्युत्पत्तिसिद्धत्वात् । तच्च यद्यपि न शब्दविषय
विभागेमाने युक्तिशास्त्रविरोधात्तामानांतरात्तुतिपादनेत्वपरीक्षायास्तत्वतिपारत्वावश्यकत्वेततए
५ संख्या वन्यूनाधिकं व्यवच्छेदः सिद्ध इत्येतस्यापि तत्र तात्पर्यमानाभावः सामान्यलक्षणपरीक्षयाद्यधिसंख्या रू५
व्यवच्छेदस्य विशेषलक्षणपरीक्षयावन्यूनसंख्याव्यवच्छेदस्य लब्धत्वात् । तथापि पदार्थमुद्दिश्य द्रव्यादि ३
विधानात् उद्देश्यस्य व्याप्यत्वाद्विधेयस्य व्यापकत्वेन साक्षादेव प्रतीतिरिति लोकव्युत्पत्तिसिद्धत्वा

त्वेन तत्र तात्पर्यकल्पनं न च पदार्थत्वेनैकं सामान्यं येन विभागः स्यात् किंतु पदानामर्थो वाच्यः तत्त्वं वाच्यत्वं पदाना
मर्थानां च तत्तत्पदाज्ज्ञानं भिन्नमेवेति वाच्यं सर्वत्र पदार्थोऽनुगतमतेरनुगतस्य तस्य सिद्धेः नायं पदार्थ इत्यभिधान
एवेन तत्पदार्थत्वापदार्थत्वाभ्यां व्याघातात् तथापि न तद्भावरूपं अभावे प्रवृत्तेः नाभावरूपं विधित्वेन
प्रतीतेः प्रतियोग्यनुपपत्तेश्चेति न युक्तं अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरज्ञानरूपसंकेतात्मक
त्वात् तच्च ज्ञानमनादिनिधनं सर्वगोचरमेकमेव तत्संबंधश्चार्थे विषयतालक्षणः अवधारणार्थश्चाव
च्छेदः तत्रैवकारस्य व्यवच्छेदमात्रे शक्तिः विशेषणविशेष्यक्रियावाचकपदसमभिव्याहारादयोगान्ययो
गात्यंतायोगव्यवच्छेदाः प्रतीयंत इति व्युत्पत्तिरिति मतमयुक्तं उपस्थितपदार्थेष्वेव समभिव्याहारव्युत्पत्तेः॥

नी०व०

संसर्गेनेदस्य प्रतीतेः। न तु ततः पदार्थोपस्थितिरपि तत्कृते च व्यवच्छेदमात्रान्वयि(त्वे)गिमात्रलाभेप्ययोगान्य
योगात्यंतायोगरूपप्रतियोगिविशेषानुपस्थितेः किंतु व्यवच्छेदत्रये शक्तित्रयमेव समभिव्याहारविशेष
तत्र तत्र तात्पर्यविशेषग्राहकमिति तत्त्वं। तत्राप्यन्ययोगव्यवच्छेदमेवावधारणार्थमाक्षिपति। एवेति।।
४ न च पदार्थबुद्धिस्थस्य विधानार्थं विशेषणे तत्त्वं नञ्समभिव्याहृतस्य एवकारस्यायोगव्यवच्छेदार्थ इत्यन्य ४
योगव्यवच्छेदोपदार्थः पदार्थस्याप्ययोगव्यवच्छेदो नैव वाच्य इति तैर्नैव गतार्थत्वेति वाच्यं। यथा पदार्थे द्व्य
त्वादिवैशिष्ट्यमज्ञातमेव ज्ञाप्यत इति तस्य विधेयता तथा द्व्यादिष्वपि पदार्थत्ववैशिष्ट्यमज्ञातमेव ज्ञाप्य
त इति तेषां विशेष्यत्वात्। ततोऽप्यत्र पदार्थे न व्यवच्छेदस्य प्रतिपाद्यत्वात्। व्यवच्छेद्यपदेन चात्र व्यवच्छेदा

छेदर

हैतदधिकरणमेवविवक्षितंनतुतत्कर्मतस्यपदार्थत्वरूपस्यप्रमितत्वात् । तथाचद्रव्यादिषट्कभिन्नस्याप्रमितत्वात् ।
पदार्थत्वंनप्रतिषेध्यम् । अधिकरणज्ञानंविनानिषेधाज्ञानादित्यर्थः । प्रतिषेधःप्रतिषेधज्ञानमित्यर्थः । समवेतत्वेवका
शानाधिकसंख्याव्यवच्छेदोयद्यपितुषट्मात्रव्यवच्छेदः । ननुपदार्थेषुसमवेतस्यापिनिषेधोवानतुसमग्रमस्यासप्रमेत्वंच
प्रसिद्धमेवेत्याह । पदार्थेष्विति ॥ उभयसिद्धपदार्थमात्रेयंनिषेधोद्रव्यत्वाद्येकैकलक्षणयोगित्वेनैकीकृतेषुषट्सु [के]
वातत्रनाद्यद्रूत्याह । अन्तर्गणिकेति । द्रव्यादिषुसमवेतत्वादिव्यवहारदर्शनादित्यर्थः । अत्यंशोक्तेः । षड्लक्षणेति ॥ तयावि
धापेक्षयाबुद्धिविषयत्वमत्रसमवेतसंख्यायाःस्तत्रानावनियममात्र । यद्यपिसाध्युपगमेनतत्रैवसमवेतत्वप्रसक्तिः । कृता
स्यात्तदातद्व्यवच्छेदसप्रयोजनःस्यान्नचैवमितिपरिहरति । षड्लक्षणयोगिष्विति ॥ ननुद्रव्यचाक्षुषविषयकेद्रव्यचा

त्वहेतिर

द्विविरोधि पदार्थत्वव्याप्योपाधिमत्त्वमेव सप्तत्वं न वर्त्तत इति नियमार्थमित्याह। एतदतिरिक्त इति॥ तथा विधोपाध्यप्रतीतेन
तमेतन्नाधिक्यसप्तत्वनिषेधः प्रतीतौ वा तन्निषेधोऽशक्य इत्याह। प्रतीतीति॥ ननु पदार्थमुद्दिश्य षट्त्वं च विधानात् षडेवेति॥ विधे
यणसंगत एवकारः षड्वायोगनिषेधकृत इति नोक्तदोष इत्याह। भावानामिति॥ अभावबुद्धौ प्रतियोगिधीर्विवदनुयोगिधीर
५ पि हेतुः। तत्र यदि षडेवानुयोगिनस्तदा सिद्धसाधनमित्याह॥ षण्णामिति॥ ननु भावव्यक्तयः षट्त्वायोगव्यवच्छेदव्या ५
प्याद्र्त्ययोरसप्तमपदार्थो भावस्यादित्याह। सर्वेषामिति॥ सर्वशब्दस्य विधेयव्याप्त्यैवासिद्धादिति भाव॥ व्याप्यत्वेतद त्व
वच्छेदकभावत्वं च संबंधप्रतीत्यैव प्रतीयत इत्यत्र सप्रतीतस्तत्रैव प्रत्येतव्यं। स च षट्त्वेव प्रतीयत इति सिद्धसाधनमेवे
त्याह। षट्त्वेति॥ अथ षड्भिन्नभावेऽपि प्रतीः तस्तदा तद्भावच्छेदोऽशक्य इत्याह॥ अतिरिक्तेति॥ ननु चाविवक्षितविशेष

तिंय२

णावच्छिन्नेषड्लक्षणपरित्यागनिषेधो विवक्षित इति नोक्तदोष इत्यत आह।सामान्याकार इति॥सामान्य
ज्ञानस्य विशेषज्ञाननियतत्वेन यदि ह्यव्याप्तिश्च विशेषेषु तन्निषेधस्य दासिद्धसाधनं।अथ तदतिरिक्ते विशेषेत द्वा
नत्रैतन्न विनाप्रसिद्धत्वाद्धिकरणस्य निषेधानिरूपणमित्यर्थः।किं च प्रतियोग्यप्रसिद्धिकरणवदयोग
१२ व्यवच्छेदस्य न विचारसहत्वमित्याह।अपि चेति॥प्रत्येकं षड्लक्षणपरित्यागनिषेधे अस्तु परमेयमानसर्वेषामदे
रती जोयत्वस्यादितिष्वपि परित्यागस्य गुणत्वाद्वाच्यत्वादिके कपरित्यागानिषेद्धुमशक्य इत्यर्थः।समुदितानामिति॥
इत्यादिषट्लक्षणानामिति शेषः।समुदितत्वस्यैकत्रसत्त्वात्मकस्य प्रतियोगिनोऽप्रसिद्धत्वात्तन्निषेद्धुं न शक्य
इत्यर्थः।न च व्यासज्यप्रतियोगिकत्वे च समुदितत्वं व्यासज्यप्रतियोगिकस्यातिरिक्तस्याभावस्यानुप

न्यी०ख०

६

गमात्। अभ्युपगमे वा तस्य केवलान्वयिनि चात्र निषेधोऽशक्य इति भावः। ननु नैकैकस्य समुदितस्य वा
द्व्यादिलक्षणस्यायोगान्निषेधः। किंचान्यमतेऽस्येति नोक्तदोष इत्यत आह। अन्यतमस्येति॥ द्वित्वादीनां गुण
दोषपरित्यागस्याप्रामाणिकत्वात्तन्निषेधे व्याघातः। अथान्यतमलक्षणासहकृतेतरपरित्यागनिषेधस्तदा स
र्वेषां लक्षणानां विपक्षे सप्रमपदार्थाभावदर्शनेनान्यतमलक्षणासहकृतेतरपरित्यागलक्षणदर्शने व्याघातः न ६॥
तदज्ञाने विना तस्याज्ञानात्। ज्ञाने वा तत्र सिद्धसाधनमित्यर्थः। अन्यतमत्वं यद्येकव्युदासेनान्यदत्तिवीयते
तदा तस्यायोग एकस्मिन्नवर्तत इति तन्निषेधोऽशक्यः। विपक्षत्वं चैकदेशापेक्षया बोद्धव्यमित्यर्थ इत्यन्ये॥
किंचाभावस्य षड्भिन्नस्य पदार्थस्याप्रामाणिकत्वाद्विभागव्याघात इत्याह। अवच्छेद्येति॥ वक्तव्यः प्र

थग्विभक्तत्वादित्यर्थः॥ ननुनिःश्रेयसोपयोगिपदार्थविभागोत्रतेनैतदनुपयोग्यभावोविभक्तइत्यतआहनि
श्रेयसेति॥ मिथ्याज्ञानाद्यभावानांमोक्षोपायतयातत्रोपयोगादित्यर्थः। वस्तुतोमोक्षस्याभावरूपतयासोप्यभिहित
इतिपृथग्विभागार्हइतिभावः। षंचैवेत्येवकारःषडतिरिक्तानांनिषेधपरः। ननुभावपरतंत्रपदार्थोत्रविभक्तःकथमभाव
श्चनतथेत्याह। पारतंत्र्यादिति॥ पारतंत्र्यंनविशेषणत्वंसर्वेषामनतिरिक्तानापत्तेः। नापिसमवेतत्वंगुणादेरप्यनतिरिक्ता
पत्तेः। नापिपरज्ञानजन्यज्ञानविषयत्वंसमवायसंयोगादेरनतिरिक्तानापत्तेरित्याह। समवायादेरपीति॥ न
न्वत्रपदार्थोद्विविधोभावोभावश्चेति। पदार्थविभागस्यार्थः। शब्दैर्द्रव्यभावरूपाद्रव्यादयःषडितिविभ
क्तविभागइतिनोक्तदोषइत्यतआह। तमश्चेति॥ ननुतमोनभावः। किंवालोकाभावस्तमः। कालेतस्या

नी०च० वद्रूपापेयत्वादित्यत आह॥ निषेधत्वेनेति॥ नञर्थोल्लिखत्वेनेत्यर्थः॥ वस्तुतो नीलरूपवत्त्वं नाश्रयतयातस्यानुल्लेखाद्
र्वमेव तस्योचितमिति भावः॥ ननु नीलादित्वालोकाभाव एवारोप्यत इत्यत आह॥ बाधकाभावेनेति॥
६ आलोकाभावेनेति॥ तमो यदि रूपवत्स्यात् आलोकानपेक्षचक्षुर्ग्राह्यं न स्याद् यत्र नीलरूपवद्द्रव्यग्रहे आलो
कापेक्षस्यैव चक्षुषः सामर्थ्यात्॥ तथा च तमो न रूपवत् तेजोनपेक्षचक्षुर्ग्राह्यत्वात्॥ आलोकाभाववदिति नीलरूप राम
वत्त्वे बाधकमित्यर्थः॥ अत्रालोकाभावाभ्यनुज्ञानीयत्वमुपाधिरित्याह॥ तस्येति॥ तमस्तु तद्ग्राह्यमित्यर्थः॥ अन्यथेति॥ यदि ७
नैवं तदा तमसः आलोकं विना नीलरूपारोपो न स्यात्॥ नीलत्वद्वित्रिविशिष्टाकारस्य चक्षुष आलोकापेक्षस्यैव
सामर्थ्यादित्यर्थः॥ अद्रव्यान्तरत्वेन वद्रव्यान्तरभूतमित्यर्थः॥ सर्वेति॥ गंधस्पर्शैकत्वान्यथात्वान्न पृथिवी नीलत्वान्न जला
दीति वायाप्यनुमतमित्यर्थः॥ अत्र नकर्मत्वमित्यपि द्रष्टव्यं॥ मेयांतरत्वं षोडशातिरिक्तत्वाभावत्वेनाभावेन मेयान्तरत्व

ई

रुपषरे

नसिद्धसाधनं।अभावेवैधर्म्येत्वावश्यसाधकः पूर्वोक्तोहेतुः।द्रगौति॥कालोपाध्यव्यापकःकालोपाधिप्र
णःस्वाधेयकादाचित्काभावप्रतियोग्यनाधारोवातद्वच्छेदकत्वंनानेकत्वस्यावस्थाइनइत्यर्थोरत्तावन्मा
त्रकालवृत्तित्वलाभः।इदमेवषट्पदार्थवैधर्म्यमित्यर्थः।मीमांसकानांयथातथास्माकमपीतिशेषः।
तेनतदुक्तयुक्तिसूचितेतिनसंग्रहश्लोकविरोधः।अतएवेति॥पूर्वोक्तयुक्तेरेवेत्यर्थः।ज्ञाततापिना
वांतरभिव्यनुभावाद्यते ज्ञातोघटइति विशिष्टप्रतीतेर्विशेषणविशेषसंबंधंविनानुपपन्नेरितिभावः।कथमन्यथेति॥
घटज्ञानवद्भूतलमितिविशिष्टधीर्विशेषणविशेषसंबंधनिमित्तायथार्थविशिष्टज्ञानत्वात्दंडीतिज्ञानवदि
तिसंयोगसमवायबाधेनतदतिरिक्तसंबंधोवैशिष्ट्यमित्यर्थः।ननुवैशिष्ट्यवैशिष्ट्याद्युपगमेनवस्थानाद्यथा

प्रमेयत्वादिवैशिष्ट्यधीः स्वरूपेणैव तथात्वापि स्यादित्याह।। यथेति।। यथेह गोत्वमितीह निमित्तं समवायस्तथे
हगोत्वसमुदायइत्यनुभवात्तत्रापि समवायांतरं स्यात्। अथ तत्र स्वरूपमेव निमित्तं तदेहगोत्वमित्यत्रापि तथा स्यादिति
समवायोपि न सिद्ध्येदित्याह।। समवायेति।। ननु समवाये समवायांतरं नोपेयते ऽनवस्थानात्। गोत्वसमवायस्तु प्र
१८ तीतत्वादभ्युपेयो ऽनवस्थायां मानाभावस्य मूलत्वादित्याह।। अधिकइति।। तर्हि घटाभाववद्भूतलमित्यत्रैव वै
शिष्ट्यानुभवाद्वैशिष्ट्यमस्तु वैशिष्ट्यवैशिष्ट्ये तु मानाभावात् नवदभावइत्याह।। अभावेपीति।। तुल्यत्वादिति
वैशिष्ट्यस्वीकारस्य वैशिष्ट्यवैशिष्ट्यास्वीकारस्य चेत्यर्थः। अत्रेति।। वैशिष्ट्यस्वीकारे [illegible]नादिरि। ली०
वैशिष्ट्याभावसाधकमानस्याभिधातुमशक्यत्वादित्यर्थः। तत इति।। प्रमाणबलाद्भावयोः समवाय

रा२ घ२ वा२ व२

वाच्यवाचकयोरपि संबंधांतरं वैशिष्ट्यमभ्युपेयं समवायाभावादित्यर्थः॥ न च वाच्यवाचकयोः संबंध एव नास्ति
अन्यथा वस्यापदस्य धर्मित्वेन हेतुत्वानापत्तेः। भूतले घटसंसर्गो नास्तीति देशविशेषनियताभावव्यवहारानुपपत्तेः॥ न च प्र
तियोगिदेशानियमात्तन्नियमः तदन्यदेशतायाः व्यवहारानापत्तेरिति भावः॥ यत्रापि संयोगस्तत्रापि वैशिष्ट्यमभ्यु
पेयं विशेषणविशेष्यवत्त्वे वैशिष्ट्यानुभवादित्याह। दंडीति॥ नैवं दंडपुरुषसंयोग एव तद्वि[illegible]यः दंडपुरुषसंयो
गाइतिप्रतीत्यासहाविशेषापत्तेरिति भावः॥ शब्दमात्रमिति॥ मात्रपदेनार्थनैरपेक्ष्यमुक्तं॥ इहायमिति॥ इह
गोत्वमित्यत्रापि इहेति धीनिमित्तं समवायो न सिध्येदत आह तत्रापि शब्दमात्रत्वाद्भिचानसंभवात्। अथाबाधितधी
बलात्तत्सिद्धिस्तदा वैशिष्ट्यमपि सिध्येदित्यर्थः॥ आधारेति॥ न द्रव्यं गुणवृत्ति इत्याद्युक्तयुक्त्या॥

वा२ त्रि२

तस्यपदार्थान्तरेऽन्वयेनतज्जन्यत्वादित्यर्थः॥ नचवैशिष्ट्यंतत्रआधाराधेययोरन्योन्यवैशिष्ट्यस्यान्वयवृत्ति[illegible]त्वादाधा
राधेयत्वयोर्मध्येकैकवृत्तित्वात्। नापिसंबंधेनान्यथासिद्धिः तस्याप्युभयवृत्तित्वादितिवाच्यं॥ ननुसंबंधस्या
न्याश्रितत्वेपियतःसंबंधिनःसप्तमीतत्राधारत्वेनाव्यवहारायतत्तुप्रथमान्तआधेयताव्यवहारःस्यादित्या
हाससंयोगेति॥ सप्तम्यर्थस्यसंयोगित्वस्यचान्वयवृत्तित्वेपिकुंडेबदरमित्यत्रबदरशब्दान्नसप्तमीअनभि
धानादित्यर्थः। एवमिहगोत्वमित्यत्रापिसमवायानासिद्धेर्वृत्त्यकारीत्यान्यथासिद्धेः॥ अथशब्दान्नतुसंबं
नेपितत्प्रतीतेर्नसाक्षाच्छब्देनोपपद्यते। तत्त्वाधारत्वादावेवतात्पर्यमित्याह। इहायमिति॥ प्रतीतेर्वैचित्र्येपियदिवि
षयत्वमन्यशब्दमात्रस्वीकारः। तदागोत्वंसमवेतमित्यादिप्रयोगोप्येवंसमर्थयितुंशक्यइतिसमवायादिक ९

गिरू
४ न

मपि न सिध्येदित्याह ॥ शब्दमात्रत्वेपीति ॥ अस्तितावदबाधितसदृशबुद्धेः सादृश्यं तत्र द्रव्यादित्रय
त्मकैगुणसमवेतत्वादित्याह ॥ सादृश्यमिति ॥ अत एव न सैविशेषसमवायात्मकमित्यपि द्रष्टव्य
व्यक्तिः सादृश्याश्रयः ॥ प्रतियोगीति ॥ प्रतियोगिज्ञानस्य सादृश्यधीहेतुत्वादित्यर्थः ॥ सादृश्यज्ञाने प्रतियो
गिज्ञानं हेतुः सामान्यरूपतया तस्य निःप्रतियोगिकत्वात् ॥ शब्दप्रयोगात्मकतद्व्यवहारं तु तद्धेतु [illegible]त्याह ॥ रि
अस्त्येवेति ॥ इदमनेन सादृश्यमिति सादृश्यानुभवात् प्रतियोगिज्ञानं विना तदज्ञानात्तस्य तद्धीहेतु
त्वान्न निःप्रतियोगि सामान्यसादृश्यं अन्यथा ब्राह्मणत्वं विरुद्धयोनिजन्यत्वं पमतत्स्वज्ञानं विना निर्विकल्प
केपि तज्ज्ञानासत्तेः तज्ज्ञाने यैः सविकल्पकसामग्र्येवेत्यपि सिद्धान्तो व्याहन्येत ॥ विरुद्धयोनिजन्यज्ञानस्य ब्राह्मण्य

कै२ मति१

नी०व०

नाः

मात्रव्यवहारहेतुतया तज्ज्ञानहेतुत्वेन निर्विकल्पकेपि तत्त्वं संसतद्व्यस्यापि वकुं शक्यत्वादित्याह। ज्ञानस्यापादेरिति॥ व्यवहर्त
व्यज्ञानेव्यवहर्तुरीहीषो योन्वसत्त्वा। व्यवहारे न्यापेक्षत्वादृष्ट्ववरीन च द्रव्यग्रहणसमकालं तत्परिमाणग्रहेपि तत्वदीर्घत्वबहुत्व
व्यवहारे तयादृष्टं त्रयोपरिमाणांतरतया प्रतियोगिज्ञानवं गपवा२ तत्कालेतद्ग्रहादितिभावः॥ अवयवेति॥ प्रागेव प्रतियो
१० ज्ञानादिति शेषः। अवयवेतूपलं द्रव्यगुणकर्मसामान्यानामपि प्रतियोगिज्ञानात् प्रागेव ज्ञानात् न तदात्मकमित्यपिद्र १०
तया ५ व्यं। ननु सादृश्यरूपं तस्य ज्ञाने प्रतियोगिज्ञानं हेतुः स्यादित्यत आह। सामान्यस्येति॥ यथा गोत्वं नित्यं तथा खत्वमिति ज्ञाना
वपिसादृश्यानुभवात्तत्तदात्मकं सादृश्यमित्यर्थः। [redacted] भावत्वेति॥ अनेन भावमात्रस्यार्थं विजक्कविज्ञागानुपदार्थम
२०नुग्र त्रस्यैक्ये। द्रव्यादीति॥ नावयवकृत्य प्रत्येकं द्रव्यादिषु तथात्वं तावत् मेलकस्यादित्यर्थः। मिलितोऽयोगइति॥ अभावत्वसिद्धि
नन्विति। मिलितलक्षणात्मकप्रतियोगग्रहसिद्धेरित्यर्थः। ननु भावत्वेन [redacted] डे व द्रव्यादिष्वेकयो विवक्षिता स्तदन्याबाज्ञा

अ२

धे सिद्धसाधनेन नवसमभभावनिषेधः। अन्येवप्रसिद्धिः। मेलकस्यात्र घटभावमात्रवृत्तिधर्मः कश्चित्रष्टाद् एवं तभावाभावा।
५२ अर्थे सिद्धसाधनं न हि घटभावमात्रवृत्तिधर्मो भाववृत्तिः तादृशधर्मोप्रसिद्धिश्च अप्रसिद्धावपि तस्याभावः सिद्धतु
तु मेलकिनां तावत्ताभूतभावानिमज्जावः। अथ मेलकाभावो न मेलकिनां अभावं विनेति मेलकि नाम पदार्थं सिध्यति
नो तर्हि मिलकिनामेकैकस्मिन् भावोभावे विधीयमानेऽत्र विशेषणे कस्यचित्सिद्धसाधनं द्रव्यत्वाभावाभावत्वस्य गुणा
दौ बाधितत्वात् द्रव्ये च सिद्धत्वात्। अन्ये मेलकोपादानं चैवं प्रत्येकमिति च व्यर्थं। न हि मिलितासु व्यक्तिषु वैलक्ष क
मेलकः पदार्थान्तरस्वीकारापातात्। अथ व्यासज्यप्रतियोगिकोयमन्यस्याभावो घटवत्यपि घटपटौ न स्त इत्यनुभवात्
यत्र यस्याभावमात्रप्रतियोगिको भाव स्तत्रैवाभावाभावस्य च वैरूप्यमिति मतं॥ तन्न॥ व्यासज्यवृत्तिधर्मसमानाधिकरण ग
प्रत्येकपर्यवसितप्रत्येकप्रतियोगिकाभावादेस्तादृशबुद्ध्युपपत्तौ नु अन्यानुपगमात्। अथ गुणादिपदार्थान्तरेऽपि द्रव्य

बं०

द्रव्य

च्चायोगो नास्तिकर्म्मादि भिन्नगुणच्चायोगो नास्ती त्ययोगव्यवच्छेदार्थः ॥ गुणादिषट्कभिन्न्ने द्रव्यभेदो नास्ती त्यन्ययो
गव्यवच्छेदार्थः ॥ नन्व ॥ गुणादिषट्कपदार्थभिन्नत्वे न यदि द्रव्यमेव विवक्षितं न तदा सिद्धसाधनं अन्यत्र चाप्रसिद्धिरित्य
भिकसैरणविकल्पयासात्र ॥ गुणाद्यभावपंचकसाहित्यं द्रव्यादन्यत्र नास्ति तस्य द्रव्य एव प्रसिद्धेः । यद्वा गुणाद्यभावपंच
कं द्रव्यस्वव्याप्यमित्यपि न । तत्रापि हि द्रव्यादन्यत्रैपदि गुणाद्येव विवक्षितं तदा सिद्धसाधनं । अन्यत्र तदा सिद्ध्यसिद्धि वे
११ व्याघातः ॥ अत्राहुः ॥ ॥ भावद्रस्पत्यंताभावप्रतियोगित्वं नैद्दलक्षणावच्छिन्नं । यद्वा भाववृत्तिगुणाद्यभावपंचकसाहि
त्यं न द्रव्यत्वाभावस्य द्रव्यत्वं वाभावद्दत्तभावपंचकव्यापकं भावत्वं वा षट्दलक्षणाभावविषट्दलक्षणाभावव्याप्यमित्यवधा ११
रणार्थः ॥ समारोपेति ॥ नयारोपस्य हेतुत्वेमानाभावः । इदमिदं नेनेदमिह त्यनुभवस्यैव प्रमाणत्वात्र । यद्वा आरोपितरजतता
यामेव शुक्तौ नेदं रजतमिति रजतत्वाभावः प्रतीयते नान्यत्रेत्यन्वयव्यतिरेकयोस्तत्रावान्तरत्वे वेति ॥ गौणाभावभेदात्प
दार्थविभागआर्थो भावविभागस्वावच्छेदात्: । तथा सा भावविषट्दलक्षणायोगः प्रसिद्धो भावेषु गुणेषि व्यतरति नाप्रसिद्धिः ॥

वार

न२

प्रमेयमिति॥ प्रमेयत्वसमानाधिकरणात्यंताभावप्रतियोगिनवाच्यत्वमित्यर्थः॥ वाच्यत्वायोगस्याप्रसिद्धेः। पदार्थोस्तरे अन्य

वद्गत्यर्थः॥ च भावस्य स्वत्वकारेणाविनज्ञानाद् प्रामाणिकत्वमेवतदनुमतमित्युन्नीयते तत्कथं तत्रायोगप्रसिद्धिरित्यत द्वि

ग आह॥ अभावस्यचेति॥ नन्वेवंद्रव्यादीनामप्यनभिधानं प्रामं तेषामपि समानतंत्रेऽभिधानादित्यतआह॥ अनु

पगमेति॥ द्रव्यादिविभोकरणे पृथक्सत्वानुपपत्तिः॥ नयतत्तदनभ्युपगतपदार्थनिबोधप्रसयने नतदुपपत्तिः॥ नैव

कल्पनागौरवापत्तेः। विनिगमकंच भावनिरूपणाधाननिरूपणत्वमवसेयमित्यर्थः॥ तमसो भावांतरं दूषयति। नीलमिति॥

तदारोपश्चेति॥ तथा च नततो विषयसिद्धिरबाधितबुद्धेरेवतत्सिद्धेरित्यर्थः॥ स्वप्राभवानेति॥ नीलत्वमममारोप

लक्षणं॥ तदाबाधेति॥ नीलरूपवत्वस्य तिर्यग्बाधितान्पृथिव्येव तमः॥ अबाधितात्तदा ततो नविषयसिद्धिः॥ नय

ततोन्यत्वस्याभावत्वसाधकमस्तीत्यर्थः॥ वस्तुतस्तु तत्र बाधकमेव वर्त्मामिइतिभावः॥ अंर्ध्वसंइति॥ रूपद्र्जन

तदा२ पा२

नी० व०

कइत्यर्थः॥ स्वेति वोहितो नाशकसमवेतस्यैव तस्योत्पादकत्वात्पत्त्यव्यवहितोत्तरक्षण एव तस्य नाशान्नानेकक्षणाव
स्थायित्वमित्यर्थः। अत्रपराद्धेति॥ ध्वंसप्रतियोगिनो हेतुत्वादिति भावः॥ एतेन अंत्यशब्दसहितो पाठोपरोद्धस्यांत्यस्य शब्दना
शकत्वेनेत्यादि का गुणकिरणावली तत्र पाकजप्रक्रियायामेकस्यैवोत्पादकत्व नाशकत्वेपयोपांत्यस्यांत्यशब्दस्य
१२ कोक्तेः कार्यकारणविरोधीति॥ पाठस्तत्राविरोधित्वेनैव द्वंद्वइत्यात द्विरोधित्वेन कार्यस्यकारणविरोधत्वं दर्शि १२ पि४
तइत्यवधारणार्थः॥ एवं सतीति॥ अंत्यशब्दापत्तिसंधाने पि तस्य व्यवहारस्य एवायमुपाधिर्वाच्य इत्यर्थः॥ ननु तत्रानो
पाधेरभावइत्याह॥ देशांतरेति॥ स्वरूपसत्त्वेवोपाधिर्न तस्य व्यवहारहेतुः किंतु तज्ज्ञानविषयः सनास्त्येवेत्याह॥
उपाधिरिति॥ अवच्छेदकइति॥ अवच्छेदसंयुक्तयोर्विभागानावः अवच्छेदकं यद्ग्रहणात्प्रागभावरूपःतदु
पहितः तथाचस्वज्ञानविज्ञानाग्रहाग्रहाभावोपहितः स्वंदःतणोपाधिविशिष्टेक्षणमात्रस्थायित्वादित्यर्थः॥

नन्वेवं विभागोत्पत्तौ तन्नाशात् क्षणव्यवहारो न स्यात्। प्रलयकाले च रवेरभावाद् अतो मतान्तरमाह। स्पंद
स्यति॥ संयोगनाशादित्यत्रोत्तरदेशसंयोगप्रागभावसहित इति शेषः। कर्मणः स्वजन्यविभागप्रागभावस
हितस्य विभागस्य स्वजन्योत्तरसंयोगसहितस्य संयोगनाशस्य वोत्तरसंयोगप्रागभाववतः कर्मणः स्वजन्यो
त्तरसंयोगसहितस्य क्षणावच्छेदकोपाधित्वं नत्वेकयोर्द्वयोर्द्वयोः पूर्वापरकालभावी संबंध इत्यर्थः। प्रलये
५क चाणुकर्मणः तथाभाव इति वै भावः। दूषयति। अत्रेति॥ तस्येति॥ स्वरूपमेव तयोः संबंधः तत्रानेकक्षण
वृत्त्येवेत्यर्थः। एकेति॥ न चात्र साध्याविशेषः स्वसमानकालीनकादाचित्काभावप्रतियोग्यसमान
कालीनत्वमनेककालानवस्थायित्वे। क्षणिकत्वं च स्वाधिकरणक्षणोत्तरक्षणानुत्तरत्वविशिष्टस्वाधि
करणक्षणोत्तरक्षणवर्तिध्वंसप्रतियोगित्वमित्यर्थात्। समानाधिकरणाविति॥ स्वनाशस्य संयोग

गि० ब्रि२

ली०त०

समानकालीनो विनाशः स्वनाशकविनाशसमानकालीनध्वंसप्रतियोग इत्यर्थः। तेन नानुप्रसंगः सिद्धांती स्वपक्षे दोषमनुपेत्यपू
र्वपक्षिणं क्षणिकपदार्थोत्तरसिद्धौ मानं पृच्छति। सत्त्वं किं पुनरिति॥ अस्तमितेति॥ स्वसमानकालीनप्रागभावप्रति
योग्यसमानकालीनवस्तुवेदनमित्यर्थः। क्रियास्पंदस्तत्र कार्यो विनाशः। असिद्धेरिति॥ तादृशे वस्तुनि प्रमाणाभावात् र्थ
२३ प्रत्यक्षस्येंद्रियसंबंधप्राचीनवर्तमानोत्तरकाले विषयस्यासत्त्वात्। तस्य च वर्तमानग्राहकत्वात्। नाप्यनुमानं व्याप्तेर
सिद्धेरित्यर्थः। ननु क्षणवेदनस्यैवं भावेन क्षणमानत्वं येन विषयाज्ज्ञानात् न क्षणानुमितिः स्यात्। किंतु स्वरूपज्ञानवद ज्ञानेतदव
स्वरूपसदेव क्षणमानमित्याह। नानेति। उक्तं तु क्षणिकस्य न प्रत्यक्षत्वमिति क्रमिकविशिष्टसंयोगादिरूपाविर
वतद्विषय इत्याह। क्रमिकेति॥ लिंगाभावादिति। व्यापकानिरूपणे व्याप्याज्ञानादित्यर्थः। अतिरिक्तेत्यवैशिष्ट्यव २३
यानानुपेयत इति भावः। क्षणप्रयोगादिति। नयनाद्यात्मकव्यवहारस्य क्षणेऽसत्त्वात्। क्षणशब्दप्रयोगस्तत्र मान

शब्द

मित्यर्थः॥ निरूपितेति॥ विषयेण निरूपिते त्वादृक्प्रयोगरूपव्यवहारनिरूपणं तत एव विषयसिद्धिरित्यन्यान्याश्र
य इत्यर्थः॥ नास्त्येवेति॥ ज्ञानव्यवहारहेतुः ज्ञानिकार्यो नास्त्येवेत्यर्थः। कारणमात्रप्रश्नस्यापि तु ब्रूयात्तदसाधा
रणं कारणं पृच्छति। किं तदेति॥ अन्यसाधारणकारणानामयात्र ज्ञानशब्दप्रयोग एवतदनुमापक इति निर्वचः
उत्तरं ज्ञानविशेषं ज्ञानव्यवहारे व्यवहर्त्तव्यज्ञानविशेषः कारणमित्यर्थः। विषयविशेषनियतस्य ज्ञानस्य व्यव
हारे विशेषोजनकत्वमिति विषयविशेषं पृच्छति। कस्येति॥ उत्तरं कर्मेति आदिपति॥ केवलेत्यादि वि
वेशिष्यमिसंत्येन उपाधौ केवले विभागप्रागभाववाँमात्रज्ञाने उपाधिं च केवले कर्ममात्रज्ञाने सति ज्ञानव्य
वहारप्रसंग इत्यर्थः। प्रदत्तादिपदवत् ज्ञानशब्दस्य नानार्थत्वापत्तिश्चेति भावः॥ ननु विभागप्रागभावादिवि
शिष्टं कर्म तद्विषय इति नोक्तदोष इत्याह। विशिष्टमिति॥ वैशिष्ट्यमत्र विशेषणविशेष्ययोः संबंधः स च स्यात्र नस्ती

दि२

मिति३

ली०ख०

नवतीत्युक्तिरित्याह। किमिति॥ अतिरिक्तं च वैशिष्ट्यं च यानान्युपेयेते। ज्ञानविशेषइति। विजातीयं ज्ञानमित्यर्थः।
तत्र स्वसामग्र्या नं कदाविदेय तथा च विजातीय ज्ञानविशेषविषयो कर्मतज्जन्य विनाशप्रागभावौ क्षणत्वाद्‌प्रयोगवि
षयः क्षणशब्दप्रयोगरूपस्य व्यवहारो ज्ञानविशेषविशेषयता प्रतिसंबन्धायकज्ञानविशेषाद्विर्युक्तं भवति। अनुज्ञानं
२४ विशिष्यते। अनेनेति॥ ज्ञानविशेषाविषयविशेषएवातर्थां हि यदि विशिष्टमतिरिक्तं न स्यात्तदा समूहालंबनं
विशेषाविशिष्टबुद्धेः स्यात्तस्य च विषयविशेषो न्योन्याभाववविशेषएवं अभावत्वेनैवाभावज्ञाने प्रतियोगिधीः का १४॥
रणमितितदभावेप्यभावोत्पादसत एवेत्युक्तं। तन्न॥ वैशिष्ट्यमात्रस्याप्रस्तुतत्वेनानिर्वचनात् विवक्षतु ज्ञानवि हार३
षविशेषस्य तद्विशेषस्यैव स्वरूप कथनात् समूहालंबनविशिष्टज्ञानस्य विशेषः कारणकृतः कार्यकृतो वेति वि तःप्रकारकर
शिष्यारव्यविशिष्टज्ञानविषयविशेषमानाभावद्यं॥ अन्यदिति॥ केवलोपाधिज्ञानकाले केवलोपाधिज्ञान

ना१ मनू

कालेचेत्यर्थः। रवेः स्पंद इति॥ विभागप्रागभावाद्युपाधिविशिष्ट इति शेषः। केवलस्पंदस्याने कालवृत्तित्वात्। नन्वेवं रविस्
दे कथं क्षणप्रत्युत्पन्नश्यादिव्यवहारस्तत्रैव दृष्टत्रेरित्यत आह तस्येति॥ क्रमवद्विभागप्रागभावाद्युपाधिचतुष्कसं
बंधात्तत्र क्षणव्यवहारे सैवोपचारिक इत्यर्थः। अतिरिक्तक्षणानुपगमेपि तत्र क्षणिकत्वव्यवहारश्चोपचारिक इत्यनु
पयं तत्रैव तद्दृष्टेरिति भावः। ननु विशिष्टव्यवहारस्यानन्यसंबंधजन्यत्वात् ज्ञानविशेषानतद्धेतुरित्यत आह संबंधे तु४
ष्विति॥ यथा विशेषणविशेष्ययोः संबंधो वैशिष्ट्याख्यफलं च विशिष्टव्यवहारं जनयति। तद्वद्रवेस्तुषु स्पंद
वि भागप्रागभावादिषु ज्ञानमेव विजातीयसंबंधफलं विशिष्टव्यवहारं जनयतीत्यर्थः। अतिप्रसंगेति॥ यथा अतिरिक्तमणि
वैशिष्ट्यं स्वविशिष्टव्यवहारं वैशिष्ट्यान्न जनयति। तत्रैव तद्दृष्टेः। किंतु स्वभावादेवेति एवं नातिप्रसंगः। तथा ज्ञानविशेषो
पीत्यतोऽत्र दर्शने प्रकृतेतदेव वैशिष्ट्यमिति निर्युक्तेरेव स्थितमिति तात्पर्यः। एतेन संबंधवशादृश्यानुकूलं तत्फलजनकं ज्ञाने

नह्यनन्यसाद्यरूपादन्यकार्यमन्यस्मादित्यपास्तमिति भावः। तद्वदिति॥ वैशिष्ट्यं संबन्धश्चैवेत्यनास्थायां बाधकाभावे चित्तद्वत्वे ६
राम विशिष्टव्यवहारजनकत्वे किमुपाधिविशिष्टप्रत्यक्षेनान्तरं। तद्विषयत्वेनैव तत्र नास्थेत्यर्थः। ननु क्षणव्यवहारोऽनुगतेनानुग
उक्त२ मतेन निमित्तेन निर्वोढुं शक्यः। कर्मैवानुगतं तदुपाधिविशिष्टत्वं निमित्तमित्यपि न युक्तं। तथापि विशेषणांशानु
१५ गमेन विशिष्टस्यानुगमात्। घटक्षणवेदनं न क्षणेमानं क्रियादेः। स्थिरत्वेन तद्विषयत्वात्। अक्षमितपूर्वपक्षेनावस्थक्तु
नः क्षणद्विषयत्वासिद्धेः क्षणव्यवहारस्य तत्र न मानं। अन्योन्याश्रयादित्याद्युक्तं तन्न॥ क्रियादेः क्षणिकत्वेपि परस्परा १५
पेक्षयोपाधित्वव्यवहारगोचरत्वात्। नहि तुल्ययोर्द्वयोः क्षणान्तरसंबन्धः अन्यतरवैकल्यं नेतुः। नाप्यन्योन्याश्रयः व्यवहा राम॥
द्विज्ञानं शक्यप्रयोगाबाधानात्। नहि ज्ञाने निरूपिते विषयनिरूपणं किंतु ज्ञानमेव तथा नोत्पः शाब्दे न स्वकारणाज्ञानाद्वेपादन
ज्ञानमेव विषयसिद्धिरिति तवाप्यनुमतं। अन्यथा कापि किंचिन्न सिध्येत्। कारणं च तत्र पूर्वपूर्वसंस्कारसहितं प्रत्यक्ष

नुप२ बाधा२ नि५

सैकान्यद्वैतन्यदेतत्कार्यस्यसंप्रतिपत्तेः। यदपिविषयस्यातथात्वेपिज्ञानविशेषात्तत्क्षणव्यवहारइति। तदसत्। ज्ञानोल्लेखितवि
षयानादरेबाह्यापलापापत्तेः। नचवाच्यंव्यवस्थाबाधस्यापिप्रमाणेनतद्विषयेप्यनास्थोस्यात्। नापिज्ञानविशेषवैशिष्ट्यं
ज्ञानानुल्लेखतत्क्षणोल्लेखापत्तेः। नापिस्वविषयेणसहकृतंज्ञानंविशिष्टव्यवहारहेतुः ज्ञानेनव्यवहारजननेस्वविषयानपेक्षणात्।
ऋनागतादौव्यभिचारात्॥ ॥अत्राहुः॥ स्थलस्यविनाशात्प्रागभावसहितेकस्मिन्नेवक्षणेप्रलयप्रणुकमेणःसत्वात्। मूधपिकर्म
प्रागभावयोःस्यादन्वेमेवतथाप्युक्तक्षयावच्छेदेनक्षणोत्तेन्यतरवैकल्यादितिनोप्रसंगः। नचस्वरूपमेवतयोसंबंधंतत्राप्यि ऐअ४
रमेवेतियुक्तं। संबंधांतरंविनाविशिष्टधीजननयोग्यस्वरूपस्यतस्यक्षणिकत्वात्। नचान्यतरवैकल्येनाप्यननुगमः
नचैवमेकक्षणस्यनानाक्षणव्यवहारप्रसंगोनानाकर्मप्रागेकालोत्पत्तेरितियुक्तं। एकस्मिन्क्षणेइति एकस्मिन्नुक्तरूपकर्म
वीपितृकावच्छिन्नेकालेवाध्यापौर्वापर्यकाभावः। नात्यः। विशेषणभेदेपिविशेष्यस्याभेदात्। अन्यथाअनेकदण्डादिमत्

ई आ

ली॰दु॰

विजगर　　　　क　　　　ता॥३

श्चैतस्यापिनानात्वापत्तेः। नैनाद्यक्षणादृत्तिव्यवहारः क्षणलवटितकाष्ठामुहूर्तादिव्यवहारश्च क्रमिकक्षणानेवाव
यइदानींस्वजन्यप्रागभावसहितंकर्मेत्यादितुमौनैनरावच्छिन्नंकालमादायेतिनाभाश्रयः। यद्वाद्रूपवतिरूपं
१६ इतिवत्तदुपलक्षितएवकालस्वरूपेतद्वृत्तिः। नहितद्रहितेतद्विरोधात्। नचैवमिदानीमिदानीमितिस्यात्। तद्धि नाम
क्षिप्तस्येदानीमुपर्यस्यैकत्वादितिशिरोक्तिरपास्ति।। यद्यपिमानाभावादितिहेतुराश्रयासिद्धोव्यधिकरणश्च। तथा
पिकारणानि। स्वरूप जन्यानुकूलाद्विशिष्टातीन्द्रियभावन्तूतधर्मवत्त्वं। तथाचैणाप्रमीयमाणत्वादितिविवक्षितं।
आत्मनिताद्दृशादृष्टप्रसिद्धेः। अर्थापत्तिरिति।। यादृशादेवकरतलानलसंयोगादेकदादाहो दृष्टस्तादृशादेवम १६
ण्यादिसमवधानेदाहाभावोदाहप्रयोजकाभावं विनानुपपद्यमानस्तंकल्पयति। तेनविनातदभावायत्त

प

दाहाभावानुपपत्तेरित्यर्थः। न च प्रतिबंधकाभावेनान्यथोपपत्तिः। उत्तेजके सति प्रतिबंधकसत्वेन तद्व्यभिचारा
त्। नचोत्तेजकाभावविशिष्टप्रतिबंधकाभावः कारणं तस्य विशेषणविशेष्यतदुभयाभावे [illegible]नुगतत्वादिति वा
च्यं। विशिष्टस्यातिरिक्तस्यानभ्युपगमे [illegible] नाननुगमात्। न च विशिष्टविरोधित्वमनुगतं विरोधो हि न परस्पराभा
वरूपत्वं विशेषणाद्येकैकाभावैर्भावाभावस्य विशिष्टत्वापत्तेः। तदभावाभावस्य तत्वात्। नापि परस्पराभावव्याप्यत्वं तद
पेक्षेकत्वं वा। [illegible] विशेषणाद्यभावस्य विशिष्टाभावत्वेन तद्व्याप्यत्वात्तदनाक्षेपकत्वाच्च॥ अत्रेदं तयोरन्यतरोऽन्यतरस्य प्रति नव०
योगिको नाम एवाभावः क्लृप्ते नैवोपपत्तेः तादृशाभावानभ्युपगमादित्युक्तौ। अभ्युपगमे वा केवलप्रतिबंधकसत्वेऽपि तदभाव
दाहापत्तेः। न हि पत्रेकमेव तत्रात्रयमिह नास्तीति प्रतीयते तस्य समुदायविरोधिनो यावत्समुदायिसद्भावघटवद्विरहादिति भावः॥ अ
अन्यथैवेति। शाब्दप्रतीतावेव कारणव्यवस्थाभावः। वक्ष्यमाणादृष्टविशेषाभावेनोपपत्तेरित्येवंपरत्वाद्दाहमणिमंत्रादिनेति॥

दाहः अ३ ह९ मा३ श्री नक३

उद्देशके सति दाहस्य जन्यादृष्टेन समानाधिकरणाग्धैर्दोषप्रतिपत्त्यादृष्टनाशात्तान्नलुप्तदाहाभावविशिष्टदाह
प्रागभावदाहदृष्टाभावस्य कारणं विशिष्टाभावकारणत्वे बाधकस्योक्तत्वादिति भावः॥ तत्रापातीति॥ मु मोक्षाख्यलिप्तस्यै
९ कालाद्यादावदाहप्रयोजननिनामदृष्टादिति भावः। ननु मेरुपादिसंसर्गस्यादृष्टजनकत्वे मानाभावात्॥ वर्णितैरौचवासमान १९
देः साधारणकारणस्याप्यत्रान्वयः स्यात् न चानुचैनैतत्त्वकर्त्तव्यं। शौचे सति तदन्वा वापत्तेः। शौचाशौचयोरेक श्री
त्रान्वयश्चासंभावित एव अ धर्मरूपत्वेन तत्र प्रेक्षावतामप्रवृत्तिः स्यादित्यत आह। प्रतिपद्यत इति॥ सर्वत्यितिमता
मदृष्टजन्यत्वात् पूर्वं शौचसत्त्वे च तस्योत्पादनात् अनोक्तदोषः इत्यर्थः। नन्वेवमपि वादिदृष्टान्मफा यप्रयोग
पि दाहानापत्तिः। न हृदृष्टे सत्त्ववत् स्वप्रतिपद्यसंन्निधिरिति निर्निमः। अग्रिमकाले प्रतिपद्यसान्निध्यदर्शना

य९ मा२ दाह४

मसत्वमिर

त्रदसिद्धेरन्नावादित्यदंतत्राह ॥ अदृष्टविशेषेति ॥ ननुसंयोगे योग्यानुपलंभात्तदन्तावह्योग्यव्यक्तिरिति चेन्नैव ज्ञोतेर्यो
ग्यत्वादित्यत आह। सचेति ॥ सत्यपि योग्यत्वे व्यंजकाग्रहात्तदग्रह इत्यर्थः । नचैवं प्रतिबंधकेऽसति चिरदाहः सत्यपि चोत्ते
जके दाहो न स्यादिति वाच्यं ॥ कार्यदर्शनमानकत्वेन तस्य सत्त्वेव प्रतिबंधकउत्तेजकाभावेन च तत्कल्पनात् । प्रहरमादह
 त्यत्रैव सावधिमंत्रपाठप्रयोक्तृनिष्ठतकाल एव प्रतिबंधकः । यद्वा संयोगभेद एव तत्रापि कल्प्यत इत्यर्थः । स्वरूपमात्रेति ॥
एकवृत्तीत्यर्थः । तेनादृष्टवदात्मसंयोगेन नार्थांतरं । कार्यानुकूलत्वेन साध्यविशेषणान्न स्पंदानुकूलस्थितस्याप्यधेना
र्थांतरं । अतींद्रियत्वेनाविशेषणान्नोक्तस्पर्शेनार्थांतरं । अत्रादृष्टापेक्षत्वेन सिद्धसाधनं । अदृष्टं ह्यात्मनि स्वरूपमात्रसं
बद्धमपेक्षणीयं च कारणैः परं एव तथा संबंधोऽप्रसिद्ध एवेति दूषणोऽसत्योऽहोंतत्रात्मवमिति ॥ नन्वात्मत्वं नोपाधिः । वीजा
दौ सर्वत्रादृष्टापेक्षतया साध्याव्यापकत्वात् ॥ ॥ अत्राहुः ॥ अयदिदिद्रव्यं पवनः तदावयविनिस्पंदानुकूलस्थितस्याप

ततएवेति ।२

त० व०

त थो ४

केन निर्द्दिष्टव्ये च योगिसाक्षात्कारादुक्तरूपविशेषपदार्थेन सिद्धसाधनं।गुणपक्षे च द्रव्यत्वमुपाधिः।यद्वा पूर्वापरि
तोषमाह।शक्तेरपीति॥ अपसिद्धांतमप्यतिशेष।तथैवेति॥ ननु सा द्वेपि चेत्तत्जन्यजनकत्वं तच्छक्तावस्त्येवान्
१८ हि शक्तिजन्यजनकत्वं न शक्तौ विरोधात्।किंच शक्तिस्वीकारानेनैव प्रमाणेन तथा च शक्त्यानलदूषणे तत्पञ्जीव्यवि हू३
रोधः।मैवं॥ प्रतिपन्नादृष्टाभावेनान्यथोपपत्तेरनुमानमप्रयोजकं।किंच यानुमितिः स्वहेतुव्याप्तिविरोधिनमर्थं सा १८ राम॥४
ध[illegible]यति।सा न प्रमेत्यनुमितेरेवाप्रमात्वमनेनोद्भाव्यत इति।ननु शक्तौ साध्यं नास्ति तथा हेतुभावोपीति न व्यभि
चार इत्याह।जननेति॥ अतो नैपक्षत्वेन व्यभिचार इति भावः।ननु शक्तौ साधकमानाभावात्संशयः स्यादिति बाध बाधक
कमाह।तस्मादिति॥ नुहेतुं स्वरूपासिद्धिः।न ह्यत्र न प्रमाणमिति परेणाभ्युपेयते अभावासाधकं शक्यते।अन्यथै
वं सर्वं सर्वत्र सौख्यं तमेवं प्रतिबंधकसत्वे सति यदभावात्र कार्याभावः स न सप्तपदार्थबहिर्भूतः कार्यजनक

निए३ साधकमानाभावेपि २

त्वात्संप्रतिपन्नवदिति विवक्षितत्वात्। अत्र वदंति मण्यादिप्रयोगजन्यादृष्टं प्रतिबंधकमिति न युक्तं किंतु मण्यादिरेव
थाप्रथमे पक्षे ...त ... त्वादुपजीव्यत्वाल्लाघवाच्च। न च प्रतिबंधकेतरस्य कारणस्यावश्यकत्वमिति कारणतावच्छेदकैकत्वात्कारणमेवम
ण्याद्यभावः सामान्येनान्वयव्यतिरेकवत्तया गृहीतस्तत्कार्यानुकूलत्वे तौ सहकारिभेदस्य कल्पनात्तद्विशेषस्याकल्पनात्।
उपजीव्यविरोधात्सहकारिप्रत्याख्यानापत्तेश्च। ऐक्यस्यैकत्वं वा संभवनात्। अथ मण्यादिसंसर्गाभावो न हेतुः न हि घटो मण्या न
घटत्वं ताभावो संयोगात्यंताभावो वा मण्यादेः स्याद्यच्चदृष्टित्वात् संयोगस्याव्याप्यवृत्तित्वादिति चेत्। न इह भूतले घटो ना
स्तीति वत्संसर्गावच्छिन्नप्रतियोगिकस्याभावविशेषस्य सत्त्वे प्रतिबंधके तत्राभावात् स च समयविशेषावच्छेदेन
संसर्गिनयात्यंताभाव एवेति विशेषो वेत्यन्यदेतत्। न चैवं प्रतिबंधके सति तज्जातीयव्यक्त्यन्तरस्याभावमादाय कार्योत्पत्त्याप

त्विःसामान्याभावस्य कारणत्वात् । तस्य च कँचित्प्रतियोगिसत्त्वे विरहात् तावतामभावानां कूटस्यैव कारणत्वात् ।
यद्वा । अत एव न प्रतिबंधकाभावत्वेन कारणत्वं अन्योन्याश्रयात् तत्कारणीभूताभावप्रतियोगिन एव प्रति
१९ बंधकत्वात् स्तिपासैमणाद्यभावकूटत्वेन कारणत्वात् । न च विशिष्टाभावानिरुक्तिः विशेषणाविच्छिन्नप्रति
योगिकस्य विशेष्याभावस्य तदुभयसंबंधाभावस्य च विशिष्टाभावात् प्रतीतिवैलक्षण्यात् । तस्य च केवलवि १९
शेष्याभावे तदुभयाभावे च साधारणत्वात् । एतेन कारणति स्वजन्यजनकादृष्टाजन्यभूतार्थेन्द्रियधर्मवत्त्विका
रणत्वादात्मवत्तात्रादृष्टं तथा सिद्धमिति सामान्यतः । मम हमते अनुपलब्धिगम्यत्वात् भावोप्यतींद्रिय इति तद्वाद्य
स्पर्शाभावभूतेति विशेषणं विशिष्यतु वह्निर्दाहानुकूलादृष्टातींद्रियाभावभूतधर्मवान् दाहजनकत्वात् । आत्मवत्

अनुकूलत्वं च कार्याभावव्याप्याभावप्रतियोगित्वं कारणतावच्छेदकस्याभावगणमिति नास्ति द्वित्वं ततः परतो वा न चात्मत्व
मुपाधिः सामान्यानुमाने स्पर्शवद्ध्वंसकारणतकालाकाशयोः साध्याव्यापकत्वात् विपक्षेदाहानुकूलोक्षमवति तेजो
द्व्यणुके साध्याव्यापकत्वादित्यनुमानं शक्तिसाधकमपास्तं स्वप्रतिबंधकाभावेनान्यथोपपत्तेः। भावभूतेति विशेषण
सामर्थ्यात्। अन्यथा शक्तिसिद्ध्यनंतरं शक्तिभिन्नत्वेन साध्यविशेषणात्॥ ततः शक्तिभिन्नधर्मसिद्ध्यापत्तेरिति संक्षेपः
विकल्परूपकुसुमांजलिप्रकाशोऽज्ञानेत्यादि। इति विशिष्टबुद्धेर्विशेषणविशेष्ययोः स्वरूप एव संबंधो हेतुरन्यथाऽज्ञानेन
ज्ञाततापत्ते प्रतिनियमो न स्यादित्याह लीलाहीत्यादि संभवत्युपाधि येनाहंकृतापीति। वस्तुतस्तु भावात् सप्तमपदार्थत्वेन
तिशेषः। नहि वैशिष्ट्यानुभव एव नास्तीत्यंडीतिवत् घटाभाववद्भूतलमिति प्रतीतेः। ननु विशिष्टव्यवहारत्वेन

विशेषणविशेष्यसंबंधस्य निमित्तस्यानुमानं कॢप्तसंबंधबाधे तत्रैव संबंधांतरे पर्यवस्यतीत्यत आह इहेति य

पदेशमात्रमिति मात्रपदेन संबंधभेदरपेक्ष्यमुक्तं॥ एतद्गुरुत्वेति॥ एतद्गुरुत्वसंबद्धतयारोपितेनेत्यर्थः। अत्यंता

 भावप्रतियोग्यपि अधिकरणयोः संबंधस्याभावात्। न चैवमेतद्गुरुत्वनिष्ठत्वमज्ञातप्रतियोगिनिरूपत्वस्य वाभावेनाधिक

रणसंबंधरूपत्वाद्व्यपदेशमात्रमित्यनेन विरोधः एतस्य व्यपदेशनियामकमात्रतया विधर्मधीनेन व्यपदेशविषयि

यामभिधायकत्वात्। तथा च यत्संबद्धतया आरोपितेन प्रतियोगिना अभावो निरूप्यते तत्त्वस्य प्रमाप्रयुक्तमिति तात्प

र्यं। दंडीति। दंडीपुरुष इत्यत्र वैशिष्ट्यं न प्रतीयते। अपितु दंडाद्यर्थत्वं तत्र दंडगुरुत्वप्रतिबंधकत्वमित्यर्थः। न च गु

रुत्वप्रतिबंधकत्वं गुरुत्वकार्यपतनहेत्वभावप्रतियोगिसंयोगवत्त्वं तच्च दंडस्याप्यस्तीति साध्याधारस्यापि प्र

तिबध्यगुरुत्वानाश्रयत्वेत्वे सतीति विशेषणत्वात्। पदार्थद्वंदीत्यत्र संयोगमात्रं विशेषणतया प्रतीयते न तु पराभिमतं
पदार्थांतरमित्याह। व्यपदेशभेदं चेति। नन्वेवं संयोगाव्यत्वाद्विशेषणात् पुरुषी दंड इत्यपि व्यपदेशः स्यात् इत्यत आह विपरीत
स्येति। पूर्वेषां प्रयोगाभावादाधुनिकानाम प्रयोगादित्यर्थः। विशेषणानामिति। नच प्राकृज्ञानविशेषावैशिष्ट्यमित्युक्तं इदानीं
च विशेषणाद्यात्मकं चैतदुच्यत इति विरोधः। तयोर्यः संबंधस्ते वैशिष्ट्यं तत्प्रयोजकं ज्ञानरूपं वैशिष्ट्यमिति कीर्तितं तयोः क
यारिस्यपदार्थयासुक्तं विशेषणविशेष्ययोर्वैत्यर्थः। ननु यथार्थविशिष्टज्ञानस्य विशेषणविशेष्यसंबंधनिमित्तकत्वात् स
विसंयोगसमवायबाधेतिरिक्तं वैशिष्ट्यं संबंधः सिध्येत्। अन्यथा समवायोपि न सिध्येत्। तथापि ज्ञानविशेषणोपपत्तेः व्य
पदेशमात्रं तु निरर्थकत्वापत्तेः। नच स्वरूपसंबंधेन सिद्धसाधनं। तस्य सतत्संबंधिरूपत्वेनाननुगतत्वात्। नोप्यतद्भूत

लसंबंधेनेव्याघत्तं नियामकं। अभावं प्रत्यधिकरणत्वे स्वस्यापि स्वेन संबंधेनानुपपादनात्तु। तथात्वे हि भूतलसंबंधः प्रति
योगितदभावविशिष्टत्वेऽपि वस्याभावत्वाभावावच्छिन्नत्वमिति। दंडीपुरुष इत्यत्रापि न युक्तं। आधारत्वाभिधानेपि वैशिष्ट्यस्यानुपप
मानस्यानुपपादनात्। तस्य तदन्यत्वात्। नाप्यनभिधानं तथा विवक्षायां पुरुषी दंड इत्यस्य प्रयोगस्य संभवात्। नहि पूर्वेषां
प्रयोगस्याधुनिकप्रयोगहेतुः पूर्वप्रयोगमज्ञात्वापि वाक्यार्थज्ञाने विवक्षायां चाभिनवकाव्यादिप्रयोगात्। नापि ज्ञान
रूपं वैशिष्ट्यं अवान्तुपलाघापत्तेः। अत्राहुः वैशिष्ट्यस्य समवायवदेकत्वात् घटाभाववति पटवति पटाभावधीप्रसं
गः। घटाभाववैशिष्ट्यस्यैव पटाभाववैशिष्ट्यरूपत्वात्। न च पटाभाववैशिष्ट्यसत्वेपि घटपटाभावोनास्ति तस्य सद्भिन्न
त्वादिति वाच्यं। पटाभावाभावस्याभावत्वे वैशिष्ट्येन संबंधेन तत्वसत्वात्। भावत्वे च पटस्य प्रतिबंधकत्वे पटाभावस्य

पदाभाववधीहेतुतापत्तेः। तस्य च वैशिष्ट्यसंबंधेन तत्र सत्त्वात्। वैशिष्ट्यस्य च अत्यन्ताभावव्यक्तिनानात्वे विशिष्टवुद्धौ नैकः।
संबंधेन निमित्तमिति तत्तदभाववैशिष्ट्यज्ञाने तत्तत्स्वरूपरूपविशेषणतैवानानुगता निमित्तमस्तु किमनंतवैशिष्ट्ये
न तिगुरुत्वेनेति यथा कुंडे दधीत्यत्रापि तंतुषु पटः पटे शुक्लरूपमित्यत्र समवायिकारणत्वं समवायित्वं कार्येपि वर्त्तत इति तत्स्वाव
त्तेनार्थकारणोत्पत्तेः। समवायिकारणतास्याभिव्यंजकत्वेपि च विभक्तत्वे तिलस्य पृथग्गुणादीनां॥ यथा समवायिकार
णत्वस्याकाशस्यनाभिव्यंजकत्वं। इह गवि गोत्वमित्यत्र व्यक्तेरभिव्यंजकत्वं। अन्यथेति। एकवृत्तित्वानंगीकारदृत्य
येः। अनुगतत्वाधारत्वं धर्मसंबंध एव। धर्मेण कुंडस्य दधितंतूनां पटे व्यक्तेश्चायोगात्वं तत्संबंधस्य स्वप्रत्यये नाभिधानं स
वंध क्वचित्संयोगः क्वचित्समवायः। क्वचिद्विशेषणत्वं। संबंधस्यान्यवृत्तित्वाद्गुणादिपि कुंडादावाधारः स्यादित्यत्र क्वचिदि

ली०व०

क्वापत्तिं कुंडे दधीत्यनयावप्रतीत्यापादध्याप्तिकं पतिकुंडादेर्धर्मित्वानुल्लेखेनानुभूतयाप्रतीतिः कुंडसंयोगाद्दध्नीत्याद्यैत्तयाप्र
तीयत एवाकुंडस्याधेयकोटिप्रविष्टत्वात्‌। विशिष्यतु तत्संप्रतिबद्धपतनाश्रयात्त्वे सति तत्तत्पतनप्रतिबंधकसंयोग
२२ वत्त्वमाधारत्वं। ईश्वरेच्छामूर्त्तमद्भिन्नाधारः। न च सहैव कुंडेन पाततिदृष्टितदसंभवः। तदा कुंडस्य तदनाधारत्वात्‌।
पतनविरोधप्रतिबंधकत्वाद्वा। अननुगतमेवाधारत्वं आधाराधेयभावस्य गोत्ववदनेकार्थः। अननुगते तु गतधीः शक्यमा २२
नानुगमात्‌। न चैवमधिकरणतात्मेदे सत्त्वाश्रया सिद्धतापत्तिः एकस्य संग्रहस्य तत्तद्व्यक्तिरूपेण सिद्धेर्विवक्षितानागमकत्वाय तत्र
तदनुपगमे तदुपगमे इति तदनुगमात्‌। सर्वनाम्नामनुगते नैकरूपेणानुबुद्धिस्थत्वादिना तत्तद्विशेषप्रतिपादकत्वमिति
सुस्पष्टैः। एवमाधेयत्वमपीति संप्रदायविदः। नापीति। सहदेशवृत्तौ विशेषणतया आसमानाधिकरण्यमपदार्थान्तरमित्यर्थः।

६३

नङ्गीति।यद्यप्येवं सामान्यादिःसदृशःस्यात्तेन यथादृष्टं तथाप्यनेकवृत्तिसामान्यादेर्न सादृश्यं।अनेकवृत्तित्वमुद्भवि
प्रकर्षेनोक्तं।ननु सामान्यं निःप्रतियोगिकं सादृश्यं तु सप्रतियोगिकं तेन सदृशइत्यनुभवादित्यत आह तत्रेति यद्यपि सामा
न्यमप्रतियोगिकं।तथापि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यमतो विशेषणांशस्य सप्रतियोगिकत्वात्तद्बुद्धि
रुपपत्तेरित्यर्थः।सामान्यं तु जात्युपाधिसाधारणं तेन सामान्ये सामान्यं नास्त्यभावेपि लक्षणारूपोपाधिमत्वात्सदृश
व्यवहारइति भावः।शेषइति।निष्प्रतियोगिकत्वशून्यइत्यर्थः।अत्र संयोगपदमनेकवृत्तिगुणोपलक्षणपरं समवायपद
च समवायस्योपलक्षणपरं।तेन द्वित्वादिव्यासज्यवृत्तीनामभावेन नात्मनोपि वैभवद्रव्यत्वसाधने एतादृशपदविशेषणा(पक्षः)।
नञ्चस्य परिशेषस्यैतत्।कोटिद्वयस्थं तन्मूलत्वेन सादृश्यं इत्यादि दृष्टान्तमूलत्वानुमानपरत्वात्।आत्मनिरासप्रसक्ति

दी०व० श्रीः यतत्त्वाभावेन परिशेषानवतारात् गुणावृत्तित्वादीति साहचर्यं न गुणः गुणासमवेतत्वात् नापि सामान्यं सामान्यवृत्तित्वात् ।
न समवायः समवायावृत्तित्वात् द्रव्यकर्मबहिर्भावस्तु येन सिद्ध्यत्वर्थः स्वतंत्र इति ख्यातं त्र्यं तर्कस्यानुग्राह्यमानासह
कृतत्वं यद्यपि द्रव्याद्यन्तर्भावसाधने व्याघातापादकतया तर्कमात्रमपि दूषणं भवत्येव तथाप्यनेन विचारेणोक्तं तन्नी
२३ वपदर्शनद्वारा साहचर्यं बहिर्भावसाधके बाधकमुच्यते तत्र च बहिर्भावसाधनमेव दूषणं ननु स्वतंत्रस्यार्थेकेदृष्टत्वे उक्त २३
त्वेपति । तत्र स्पर्शवन्नवेत्यादौ दीत्यर्थः बहिर्भावस्य विवरणं षट्पदार्थातिरिक्तत्वस्येति [illegible] स्वत्वं पदार्थो न तु षट्कं । तद्धि
मनःसामान्यादित्रयात्मकं तुल्यत्वविनाशशीलत्वात् तन्नापि द्रव्यादित्रयात्मकं गुणोपि सत्त्वे अथ तत्र मानाभावः तथा
हि । तत्र प्रत्यक्षं न मानं तद्धि न बाह्यं स्पर्शवत्त्वाभावे ग्रहेपि तत्र संशयात् अस्य मिति विपर्ययाच्च नापि मानसं मनसो बहि

विरोधात् अशक्यसाधनत्वात् २

र प्रवेशेः स्वत्वमस्त्वात्मैव बाह्यं तु धनं तस्य निरूपकमात्रमिति चेन्न । न उक्तो स्वत्वात् प्रतिग्रहादिज्ञानसहकृतमनोग्राह्य
मिति चेन्न्तमप्रतिग्रहादिज्ञानस्य मानान्तरत्वापत्तेः परैर्वासाधारणं सहकार्यो साधमनो बहिर्गोचरप्रमाजनकं तस्य प्रमानान्तर
त्वात् । नापि प्रतिग्रहादिक्रियाधनप्रतिग्रहीत्रादिसंबंधजनिका कर्तृकर्मनिरूप्यक्रियात्वात् । गमनवदित्यनुमानेन तयोः स्वत्वाख्य
संबंधमानं कर्तृकर्मभावेन संबंधेनासिद्धसाध्यत्वात् । न च गंतृग्रामसंयोगवत्साक्षात्संबंधः ग्रामं त्यजतीत्यादावनैकांतिक स्व ३
त्वात् । न हि तत्र त्यागक्रियया कर्तृकर्मणोः कश्चित्तेषां शब्दव्यदिलेनुमानं । अग्राह्यधनुगतशब्दप्रयोगे अनैकान्तिकत्वात् ।
तत्रापि वाह्यादिपदवाच्ये अनुगतधर्मस्वीकारापत्तेः । अथ प्रतिग्रहाद्यनंतरं यत्र विनियोगदर्शनात्तयोः कार्यकारण
भावः स च न साक्षात् प्रतिग्रहादीनामाशुविनाशित्वात् । विनियोगस्य च कालान्तरभावित्वात् । नापि ध्वंसद्वारा स्मृतेरप्यनुभव

साक्षात्संबन्धो जन्यते नापि अर्जितेषु सर्वत्र स्वमित्यनुगतः शब्दप्रयोगः अनुगतधर्मनिमित्तकः
पं ४ अनुगतशब्दप्रयोगत्वात् २

ध्वंसतत्स्वत्वलापत्तेः संस्कारापलापापत्तेः प्रतियोगिध्वंसयोरेकमात्रजनकत्वान्न तथेति तुल्यं। तस्मात्प्रतिग्रहादिजन्यो धर्मवि
शेषः कल्प्यते स एव धनगतः स्वामिनिरूपितस्य च विक्रयादिना नाशइति मतं तन्न तन्नाये चौर्यानंतरं यथेष्टविनियोगात्र
२४ चापि स्वत्वकल्पनापत्तेः। न चेष्टापत्तिः चौर्यापात्तस्य धनस्य यथेष्टविनियोगे शास्त्रनिषिद्धवि॰गानानुपपत्तेः स्वत्वाश्रय
त्वाद्धि नियोगस्यानुपपत्तेः तस्य धर्मस्य स्वत्वरूपतया यथेष्टविनियोगहेतुत्वे मयेदमर्जितमिति ज्ञाननैरपेक्ष्येण यथेष्टविनियो २४
गापत्तेः। तादृशज्ञानविशेषितस्य च तस्य तद्धेतुत्वे लाघवात्तादृशज्ञानस्यैव तद्धेतुत्वोपपत्तौ तस्य
वासिद्धेः। अत एव प्रतिग्रहादौ नैव साधनताज्ञानं विना प्रवृत्तिरिष्यते यथेष्टविनियोगात्प्राग्न्यत्र नाशाशुविना
शितया साक्षाद्धेतुत्वाभावात्तज्जन्यधर्मान्तरमपि कल्प्यमानं। किं च स्वीयत्वस्य यथेष्टविनियोगहेतुत्वे मानाभावः। विनियोगह

पायाः प्रवृत्तेरिष्टसाधनताधीजन्यतया तत्र निरपेक्षत्वात्। तत्र च तदुद्देशे विशिष्टस्यैवेष्टसाधनत्वमिति वाच्यं। स्वत्वास्पदा
नास्पदयोर्विनियोगफले विशेषाभावात्। न हि परकीयस्वत्वास्पदान्नभक्षणेन बुभुक्षा न प्रशाम्यति। नैवं शब्द एव हि स्वत्वे मा
नं तथा हि स्वक्रियाक्रयप्रतिग्रहादिः स्वत्वहेतुत्वेन धर्मशास्त्रेणावबोध्यते ततस्तत एव तत्तदुपात्ते धने स्वत्वमुत्पद्यते। चौर्यादेस्तु न तथेति
न तदुपात्ते स्वत्वं। अत एव स्वत्वे सत्यपि पुत्रादेर्विनियोगनिषेधेऽशिष्टाचारः एवं यथा विभक्ताश्च विभक्ता वा दायादाः
स्थावरे समाः इति। अनेन सुतानामसंमतौ दानविक्रयादिनिषेधः स्मर्यते। यथा च सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्य
मिष्यते। सा यथाकाममश्नीयाद्दद्याद्वा स्थावराद्विते। इत्यनेन स्थावरे स्त्रीणां भोग एव स्वत्वं न दानविक्रययोः। अतो वाच्य
ति। स्वत्वं न यथेष्टविनियोगविषयत्वं। स्वं हि विनियुज्यते। न तु विनियोगात् स्वं भवति। विनियोगात् पूर्वमस्वत्वे प्रतिसाधारणापत्तेः। वि

न्या०व०

नियोगाविषयेस्वेष्टस्वत्वापन्नेष्वकिंतुयद्व्यतिरेकेणायथेष्टविनियोगासंभवस्तन्निश्चयःशास्त्राविरुद्धस्तदुपायविषयत्वरूपं
यथेष्टविनियोगयोग्यत्वंस्वत्वं।तदुपायानांक्रयप्रतिग्रहादीनांक्रियात्वेनास्थिरत्वेपितद्विषयत्वंस्थिरमेवज्ञाननिवृत्तावपितत्
२५ विषयत्वं।अत एव न तद्रूपदार्थांतरत्वं।न च क्रयादीनामननुगमाद्योग्यतानुगमोलक्षणादोषःस्वत्वस्यपदार्थांतरत्वेपितद्धेतू
नांक्रयादीनामननुगमात्कारणताभंगापत्तिः।अथतृणारणिमणीन्यायेनकारणताग्रहः।एवंतर्हिप्रत्येकमेवक्रयादीना २५
मुपायत्वेगृहीतेउपायविषयत्वयोरपितादात्म्यग्रहणमेव।अवश्यंहिक्रयादीनांस्वत्वोपायत्वेनप्रसिद्धानामेकरूपकार्यप्र
मितितथाव्यभिचारिताकारणतानिर्वाहायानुगमार्थंशास्त्राविरुद्धत्वादिकमनुगमकंवक्तव्यं।ननुयदिक्रयाद्युपायाप
गमेपितद्विषयतास्ति।तदायत्क्रीत्वाविक्रीतंगृहीत्वादत्तंतत्रापितद्विषयतास्त्येवेति।तेनविक्रेत्रादिस्वत्वमपिव्यावर्तेत।

न भक्त्युपायविषयत्वमात्रं योग्यता। किंतु स्वव्यतिरेकप्रयुक्तामयोक्तविनियोगासंभवनिश्चयसहकृतं। तत्र चन
पूर्वकृत्यव्यतिरेकप्रयुक्तो विनियोगासंभवः। किंतु विकृत्यदृष्टत्वप्रयुक्तः। एवं च पदार्थोऽतदैत्वपक्षेपि दूषणासाम्यात्। सा
च योग्यता कथं ज्ञायते। विकृपान्निवर्त्तते एकायाभूपतानश्यति। अन्यथा त्वन्यस्योत्पद्यते। तत्किं योग्यतानावेनाकः
संशयः। तद्व्यतिरेकप्रयुक्तत्वविशेषितविनियोगासंभवनिश्चयभेदेन योग्यताभेदात्। प्रतियोगितावच्छेदकवि
शेषिताभावभेदेऽवच्छेदकभेदात्। एव चोरादिनाग्रहीते पूर्वस्वामिनः स्वत्वं वर्त्तत एव। नहि पूर्वागमकव्यतिरेकप्रयुक्त
स्तत्र विनियोगासंभवः। किंतु चौरादिग्रहीतत्वप्रयुक्तः। चौर्यपाहारानिकस्वत्वविषये पितृधनेष्व आरण्यककुशादिष्वप्य
पाहानव्यतिरेकप्रयुक्त एव विनियोगासंभवनिश्चयः। तेन चौर्यपाहारानिकमपि स्वत्वं समुच्चत इति संक्षेपः। विशेषस्तत्याह

तत्वादित्यर्थः। तथा सतीति द्रव्यादित्रिके मिथो व्यावर्त्तकधर्माभावान्न मिथो भेद इति न पदार्थप्रविभागः समीची
नः किंतु पृथिव्यादिरूपाद्युपग्राहकद्रव्यत्वगुणत्वाभावेन तेषां प्रत्येकं वक्तव्यतायां द्रव्यादिपदस्यैकैकपृथिव्यादि
परत्वेन न्यूनत्वं पृथिव्यादीनां चैकत्वव्याघात इत्यर्थः अनुगतमिति निर्द्रव्यमिति प्रत्यक्षमित्यर्थः। संदिग्धत्वाद्वा
२६ द्विप्रतिपक्षेरिति शेषः द्रव्ये अनुगतमिति मित्यर्थः। स्वातंत्र्यधीर्यद्याश्रयत्वबुद्धिः। तदा गुणादिसाधारण्यं। २६
अथाश्रयाभावेनाश्रयमानत्वं तदा शब्दगंधादिसाधारणत्वापत्त्याह। शब्देऽपीति। अथानाश्रितत्वबुद्धिः सा तदावेपरी
त्यमेवेत्याह। समवेतत्वेनेवेति। संख्यादीति निरूपाद्ये संख्यादेः संख्यादेः पृथक्कादेः सत्वेन गुणत्वस्य साधारणापा
तात् विरुद्धत्वादित्यर्थः। किंतु गुणत्वं गुणत्वाश्रयवत्वं रूपवत्वमिति प्रत्येकं वा रूपादिमत्वं वा रूपाद्यन्यतमत्वं वा श्र

घरूपाँति॥रूपादौ गुणाकारानुगतप्रतीत्यभावादित्यर्थः॥द्वितीये भिन्नेति॥तृतीये आदित्वस्येति॥प्रकारवाचि
न आदिशब्दस्यानुगतधर्मं भावेनाप्रवृत्तेः॥प्रत्येकगुणपरत्वे तस्य नानासिद्धिः समुदायपरत्वे चासिद्धेरित्य प्र२
र्थः॥चतुर्थे अन्यतमेति॥अन्यतमत्वं हि समभिव्याहृतपदार्थमध्ये किंचिद्वृत्तित्वे सति किंचिदवृत्तित्वमसौ धर्म॥
तथा च नानासिद्धिः पदार्थीकृतेषु नवसु तेषामसत्वादित्यर्थः॥यद्यपि नानासिद्धेर्ज्ञानांतरे साधर्म्यतावादस्य
प्रसिद्धत्वावस्यदूषकताबीजस्यात्राभावः॥नानात्वसाध्यसाधकस्यानलत्वादेः सत्वात्॥नचात्र नानासिद्धि
पृथिव्यादन्यान्यत्वस्य विवक्षितत्वात्॥तथापि पृथिव्यादि व्यक्तीनां प्रत्येकमनुपस्थापयितुमशक्यत्वात्॥पृथिवी
त्वादिना तदुपस्थितिर्वाच्या॥सा च पृथिवीत्वाद्यसिद्ध्या न संभवति॥रूपादेः संख्यादिसमवाइकारणत्वेपि

विरुद्धत्वमित्यभिसंधिः। एकत्वमिति। गुणादिव्यावर्त्तकैकजातिमत्त्वमित्यर्थः। असमवायिकारणत्वादिति। ए
२७ तद्धासमवायिकारणेऽपि गुणत्वमेवेवांतरजातेरसंभवात्। पदार्थत्वसाक्षाद्व्याप्योपाधीनामयं विभागइ
त्यभिप्रेत्योक्तं। षडेवेति।। यद्यपि षडेवेति नियमस्याधिकसंख्याव्यवच्छेदकत्वान्न्यूनत्वेऽपि नानुपपत्तिः तथापि ष
डाश्रयविभागः षट्त्वाभावे नाश्रयासिद्धिः। अंत्यावयविरूपादेर्विनश्यदवस्थकर्माणि वा समवायिकारणत्वेन भावा
तेषामाधिक्येऽधिकसंख्याव्यवच्छेदोऽपि अनुपपन्नमित्यप्याहुः। कार्याश्रयत्वमिति।। आनन्त्यव्यभिचाराभ्यां व्यक्तौ २७
तदसंभवादित्यर्थः। अकार्येति।। आश्रयपदेनेत्यल्पेकमन्वयात्। अकार्याश्रयत्ववत्कार्याश्रयत्ववदित्यर्थः। ननु कार्यसम
वायिकारणतावच्छेदकतयानवस्थैको धर्मः स्वीकार्यः सैवाजातिः स्यात् आनन्त्यव्यभिचाराभ्यां व्यक्तौ तदुक्तावधुचा
दित्याहा। कारणत्वमिति।। एवं पृथिव्यादिचतुर्षु स्पर्शसमवायिकारणत्वेनैकजातिः स्यात्। अथ यदर्थं यत्क

कॢप्यते तस्यान्यथासिद्धिरेव कल्पनपि वा बाधिका तदाद्यत्वेपि तुल्यमित्याह। स्पर्शेति॥ ननु भाष्ये रूपत्वं गुणादितो भेदकं

गुणत्वात् इत्यादेर्गुणानां भेदसिद्धेर्गुणत्वमुपाधिर्द्रव्याणां भिन्नभेदसाधकं स्यादित्याशंक्य गुणत्वासिद्धिमाह। नापीति।

रूपादिषु गुणाकारानुगताधीर्नास्तीत्युपदेशसहकृतेन्द्रियग्राह्यं तद्गुणत्वं व्याप्यजातिवदिति वाच्यं। तत्राह। उपदेशस्येति।

ननु जातिमात्रसमवायित्वादिनानुगतधर्मेण संकेतग्रहस्यादित्यत आह। नापीति॥ न च कर्मान्यत्वेन तद्विशेषणीयं। कर्मत्वादि

विपक्षत्वनिश्चय एव तद्याहृत्यर्थे विशेषणमनुचितं। न च कर्मगुणान्यत्वादिना तथा। यदि च स्वानपेक्षितत्वमात्रेण तदन्यत्वं विशे

षणं तदा परिस्पन्दत्वमपि तद्विशेष्यं स्यादित्याह। तदन्यस्येति॥ कालाकाशादीनामिति॥ कालादित्रयं सत्ताव्याप्यजातिमत्।

संयोगजनकत्वात् कर्मवत्। न च जितयमात्रवृत्तिजातिसिद्धौ अर्थान्तरं पृथिव्यादिषट्कं सत्ताव्याप्यजातिमत्। संयो

गजनकत्वात्।आकाशवदिति पृथिव्यादिवृत्तित्वसिद्धेः।ननु विभुत्वमात्रोपाधिः।न च काले सा जातिर्न कालमात्रवृत्ति
त्वे कथं कृत्सामान्यासाधारण्यदन्यत्र वर्तमानत्वेनापि संभाव्यत इति साध्याव्यापकत्वमिति वाच्यं।तथापि संदिग्धोपाधेरपरिहारा
२८ त्मैवं।विभुत्वमनवच्छिन्नपरिमाणवत्त्वं तच्चानवच्छिन्नपदं प्रकृष्टमात्रव्यावर्त्तकमिति पक्षेतरत्वाच्च।तथाप्यर्थान्तरत्वं पृ
थिव्यादिष्वेकजातिरस्ति न वेति हि विवादो न तु कालादिवृत्त्येकजातिमत्त्वं वेति।द्रव्यत्वापरजात्यवत्त्वमिति चेदेवं स्यात्। २८
किं च संयोगाजनकत्वं यदि तत्समवायिकारणत्वं तदा दृष्टान्तासिद्धिः।तदसमवायित्वं चापक्षधर्मः।तन्निमित्तकारणत्वे
तद्दृष्टान्ते तेनाप्यात्मना वेश्यनैकान्तिकं चात्र वाङः।द्रव्यमिति प्रत्यक्षं तावत्सर्वसिद्धं।तच्च यथा पृथिव्यां तथा जलतेजसो
रपीत्यन्तत्वसाधारणानिमित्तं सिद्ध्यति।न च न पृथिवीत्वादिकं एकदेशावच्छिन्नत्वाज्ञानरूपत्वादिकं।तदज्ञानेपि धूमादौ रामा

भौ
त्रप्रा१

द्रव्यत्वप्रत्यक्षात्तद्वज्जातिसत्त्वे बाधकाभावादित्यतींद्रियेपि वायुर्जलाकाशादौ संयोगजनकत्वाद्द्रव्यत्वमेयं। न च बाध
योजनैकत्वं संयोगमात्रं कार्यमात्रमेव वा प्रति समवायिकारणं किं विशिष्टद्वास्यं। अन्यथाकारणांतरमपि न स्यात्
तत्र गन्धत्वादि समवायिनि निमित्तकारणयोः। तद्वानुगतधर्मावच्छेद्यमन्यथा व्यभिचारादकारणत्वापत्तेः। स चानुगतस्सगत्वा
ए जातिरूपमेवेति विशेषे बाधकाभावात्। स्पर्शोस्य समवायिकारणत्वेनापादितां जातिं द्र[illegible]यति। पृथिव्यादाविति। जलत्वं विना ज्ञा
तिः पृथिव्यादौ तां विना जलत्वं जलपरिमाणाविशेषकत्वाव्यवहिनिपरस्परात्यंताभावसामानाधिकरणजात्योः संकरापत्तिरि
त्यर्थः। न च जलपरमाणुषु सा जातिरस्त्येव समानाधिकरणस्य स्पर्शोस्य च प्रतिबंधकत्वान्न तत्र स्पर्शोत्पत्तिः। स्वरूपयोग्ये
कार्यानवश्यंभावादिति वाच्यं। नित्यस्य स्वरूपयोग्यस्य सहकारिविरहप्रतावत्त्वपंगावात्र। एतद्व स्पर्शस्य कार्यक

जला२ कार्यहित्वेन।

यैकारितयातद्वैजात्यंवा। आद्यव्यभिचारः द्रव्यकर्मणोस्तथात्वे वैजात्यात्। सर्वांसिद्धसाधनं च। अंत्येनूपादीनामेकजा

तीयत्वासिद्धेरर्थान्तरं सामान्ये व्यभिचाराच्च। अदृष्टेश्वरज्ञानादौ विरुद्धकार्यकारितया गुणत्वाभावापत्तेश्च। अत्राहुः॥

३० संयोगविभागसमवाइकारणत्वासमवाइकारणत्वशून्येजातिमन्नियकारणत्वं तदसति बाधके जातिरूपधर्मा ३०

वच्छेद्यमिति गुणत्वं सामान्यमवस्पोगीकार्यं रूपत्वादीनां मिथोव्यभिचारात्। असन्नायाश्च जातिप्रसंजकत्वात्।

एवंचरूपोत्तरकारणत्वेन द्रव्यकर्म्मसाधारणीया जातिर्यदिसिद्ध्यति सिद्ध्यतु संयोगविभागौ प्रति समवाइकारणत्वे

ननवसु द्रव्यत्वं तदुत्तरं यं प्रत्यसमवाइकारणत्वं पंचसु कर्म्मत्वात् नैकैव द्रव्यकर्म्मविभागः समाप्तः। यद्वा॥५

निमित्तकारणानिरिके संयोगविभागेनपकारणत्वेनर

संयोगविभागे

कार्यतानवच्छेदकत्वे नित्यस्पर्शवत्त्वस्य तथात्वमभ्युपेत्योक्तं। चलतीति॥ प्रत्यक्षसिद्धकर्मत्वमित्यर्थः। न च संयोगविभागाश्रय
त्वमात्रालंबनेयं प्रतीतिः। श्येनसंयोगविभागवति स्थाणावपि तदापत्तेः। इत्याकारानुगतबुद्धेरभावमभ्युपेत्याह। न चेति॥ ग
हीतसमवायस्येति॥ वस्तुतस्तदुपदेशं विनापि रत्नविशेषैरनुगतधीरस्त्येव। शब्दविशेषवाच्यत्वं परमुपदेशात्प्रतीयते। न
च येनानुगतरूपेणोपदेशस्तेनान्यथासिद्धिः। जातौ बाधके सत्येवोपाधिस्वीकारात्। न चैवं वैपरीत्यमेव स्यादुपाधेरुक्त्वा स
वा दितिध्येयं। साक्षात्संबंधेन धर्मस्यावच्छेदकत्वे बाधकस्यैव परंपरासंबंधस्य तथात्वान्नाभाववादितिभावः। समवायस्का
रणानियामकत्वे द्रव्यत्वाभावे व्यक्तितः कारणत्वानिरूपणेन व्यभिचारात्कारणत्वव्यवहारविलोप इत्याह। न चेदेवमिति। स
र्वव्यक्तिष्विति। गुणकर्मादिव्यक्तिष्वित्यर्थः। कतिपयेति॥ समवायकारणत्वस्येति शेषः। सामर्थ्यात्। स्वभावादित्यर्थः।

पी१

रमा

भो

द्रव्यत्वप्रत्यक्षात्तत्तज्जातिस्वीकारे वाधकाभावादित्यतो द्वयेपि वायुर्ज्जलाकाशादौ संयोगजनकत्वाद्द्रव्यमेयं ।। नवाप्र
योजनैकत्वं संयोगमात्रं कार्यमात्रमेववाप्रतिसमवायिकारणं किंचिद्दृष्टान्ताख्यं । अन्यथाकारणंतरमपि न स्यात् ।
तत्र गन्धत्वाद्समवायिकं निमित्तकारणयोः । तद्वानुगतधर्मावच्छेद्यमन्यथा व्यभिचारादकारणत्वापत्तेः । स चानुगतउत्सगता
ए जातिरूपमेवेति विरुद्धे बाधकाभावात् । स्पर्शस्यसमवायिकारणत्वेनापादितां जातिं दूषयति । पृथिव्यादावित्ति । जलत्वं विनाजा
तिः पृथिव्यादौ तां विना जलत्वं जलपरिमाणाविलक्षणावयविनि परस्परात्यंतभावसामानाधिकरणजात्योः संकरापत्तिरि
त्यर्थः । नचजलपरमाणुषु साजातिरस्त्येवासमानाधिकरणस्यस्पर्शस्य च प्रतिबंधकत्वान्न तत्र स्पर्शोत्पत्तिः । स्वरूपयोग्यस्य
कार्यो नवश्यंज्ञावादिति वाच्यं । नित्यस्य स्वरूपयोग्यस्य सहकारिवैकल्यं तावत् न संभवात् । एतच्च स्पर्शत्वस्य कार्यक

ज्ञेला ३ कार्यतित्वेन ।

निमित्तकारणतातिरिक्ते न रूपेण या संयोगविभागोनयकारणता तद्विरोधिनीया सामान्यसमानाधिकरणकारणतासा गुणत्वव्यवस्था
पिकाद्रव्येच न यथा द्रव्याकारणता विरोधिनि । कारणतावच्छेदकविरहव्याप्यतत्तन्निमित्तकारणत्वेन समावेशात् । सामान्यस्य ताद्रूप्य ।
कारणतापि न सामान्यसमानाधिकरणा न चैवं समवायिकारणतातिरिक्तकारणत्वेन गुणकर्मणोरेका जातिः सिद्ध्येत् ।
तस्य जात्यव्यवस्थापकत्वात् । अन्यथा निमित्तकारणतातिरिक्तकारणत्वेन संयोगभंगत्वेऽपि जातिसिद्धौ जातिसंकर
पत्तेः । गुणत्वे प्रत्यक्षमानमाह । उपदेशश्चेति ॥ संयोगेति ॥ विभागपूर्वकसंयोगासाधारणकारणत्वाभावो वा गुणत्वव्यंजक इ
त्यर्थः । तेन संयोगस्येश्वरज्ञानस्यादृष्टस्यावोपर्यो । जनकत्वेपि न तत्र गुणत्वाभावः । नाप्यान्येति ॥ गुणत्वेनानुगतधर्मेणे
दंशासिद्धिस्ततश्च गुणत्वसिद्धिरित्यन्योन्याश्रय योनेयमित्यर्थः । अर्थत्वमपीति ॥ जातिरिति शेषः । सत्तेति ॥ सत्तयासह

न्यूनानतिरिक्तवृत्तित्वा चार्थवं जातिरित्यर्थः।अत्रेति।द्रव्यंगुणत्वसाधकमानइत्यर्थः।निरुपाधित्वादिति॥निरूपधौविरूपभवा
सिद्धाविति स्थितेरितिसाक्षाद्भूतं दलं द्रव्यत्वमिथो भेदकसिद्धौ।वि ति भेदकमासिपति।पृथिवीत्वेति।घृतत्वादावि
३१ ति।तथा च भागासिद्धिरिति भावः।निपुणेनापि घृतादौ पृथिवीत्वानुभावो सिद्धत्व।नादृशोपि यदागमकस्तदा ३१
लादावपि न सिद्धो न तु स्याह।जलादाविति।संदेहेपीति।घृतादौ पृथिवीत्वसंदेहेपि भागासिद्धिः संदेहेपि इति भावः।
औपाधिकत्वेति।पवैकाद्युपाधेरन्वयव्यतिरेकानुविधानादिति भावः।चंपकेति।द्वितीयाणां प्राप्यकारितयोऽन्य
गतत्वं पक्षभागानां गंधाग्रहणादिति भावः।आगमनेनेति विवादाध्यासितां चंपकावयवां यदि चैत्रघ्राणसंयुक्तत्वे
सति चैत्रघ्राणग्राह्यगंधाधिकरणानि स्युः।चंपकावयवानस्युरित्यर्थः।कर्पूरेवेति॥प्रचुरतरभागविभमनं

जा अत्रापि

(लतानीतो । संख्या । परिमा कत्वप्रतीतौ आपा पि विस्पर्शे [illegible] । विपर्ययादेवसायादपाकजकचनिश्चयादिष्प

त्वावहुस्वाधिकरणत्वं चेतिव्यर्थहतमित्यर्थः ॥ नापीति ॥ नेदकइतिशेषः ॥ अयेलक्षण्यादिति ॥ अवैलक्षण्यं च स्वासमानाधि
करणद्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधिकरणगुणत्वभिन्नानाजातिव्यापकगुणत्वव्याप्यजातिमत्त्वं वा एकद्र
त्तित्वे द्रव्यत्वव्याप्यविनष्टोपाधिव्याप्यमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वे स्वरूपासिद्धमित्याह ॥ स्पर्शस्यापीति ॥ एकोपादेय
त्वे सामान्यगुणत्वस्यापि चानीतिभावः ॥ अस्तितावदिति ॥ ननुमध्यादौ गंधयोग्यानुपलंभबाधितो न वघ्राणेंद्रियत्रा
पि गंधोपलंभः ॥ पार्थिवगंधविलक्षणगंधानुभवात् ॥ नापि पाकजरूपवत्त्वेन गंधस्यानुमानं गंधज्ञानसहकृतेनेंद्रिये व
णतत्र पृथिव्यां [illegible] गृह्यते ॥ अतीन्द्रियमानाभावात् तस्य जलादावपि सुवचत्वात् ॥ अत्राहुः ॥ जलादावावृत्तगन्धवत्त्वाभिमानस्य
पृथिवीमए वततद्‌संस्कारेण तत्र चगंधउपलभ्यत एव तथा च व्यवहारज्ञ कचात् ॥ सलिलपरमाणुर्गंधवानिति ॥ गंधव्यवहारस्य चेन
मप्याप्यपि गंधवद्देव ॥ स चाङ्गतो नास्तीत्यनुद्भूतः कल्प्यते ॥ न चोद्भूतगंधेनानुद्भूतगंधानारंभः ॥ अतीतैलादावनुद्भूतेनसाद्भूत

त ३ त १

लो०व०

भा रूपत्वासंत्त्ववदविरोधात्।जलादौ चतत्सत्त्वान्नातिप्रसंगः।अपिच।कोलादृष्टादीनांपराहत्तुनुत्पत्तिप्रसङ्गः रूपतेजलौलादौ च निय
मेन न दृश्यत इत्यापि विशेषप्रयुक्तोयमिति परिशेषवत्वादीनामनियामकत्वात् सकलद्रव्यादिव्यापकत्वासिद्ध्यादृतेत घा
३२ रूपताव्रूटकरूपसिद्धिः।तत्रबाधकाभावाज्जातिः।एवं नीलादिरूपाण्यादिरससमवायिकारणतावच्छेदकतयाऽभिघात व
विकृवमेसिद्धिः।नचैवं सुखसमवायिकारणत्वेन संसार्यात्मनिष्ठा आत्मत्वव्याप्याजातिः स्यादिति इष्टापत्तेः।नचनवैवद्र ३२
व्याणीतिव्याहतं।ज्ञानवत्त्वेन विभागात्।आत्मनस्तु नित्यद्रव्यत्वेन द्रव्यत्वव्याप्यव्याप्यजात्यभावसाधने विपक्षे बाध
काभावः।सुखसमवायिकार्यत्वस्याधर्मत्वेनावच्छेदकमेव।अदृष्टाभावाद्यनेश्वरे सुखमित्यपि वदंति।अनिलादावपि॥
नमश्चेपंकगन्धीलत्रचंप कस्येव गंधोस्तीत्यर्थे उपमानाद्वैत्यपने न समासोत्र विधानाद्युपकं गंधामित्रगंधवचने

प्रतीयत इति वाच्यं । उपाधेरन्वयव्यतिरेकात्तस्यैव वायोर्दूरे निर्गमे च न प्रत्यभिज्ञानाद्य । तयोर्ह्यपीति ॥ फलेन सामग्र्यनुमान
स्य तुल्यत्वादित्यर्थः । अत एवेति ॥ न चेतरोरा व्याप्तिक वायुनापार्थिवावयवानामेव नैयत्याज्जलतेजोवृत्तीच तस्य पाकाद्
स्य वृद्धिः क्लेदेन तु तदभावाद्दृष्टाभावः । कर्पूरे वा व्याप्तिक वायोरभावाद्दैराग्यमिति वाच्यं । फलेन सामग्र्यनुमानस्य तुल्यत्वादित्यु
क्तत्वात् । उपाध्यज्ञानेपि सुरभिर्वायुरिति प्रतीतेर्वायोर्गन्धः स्वीकाराविकल्पादित्यत आह । वायोरिति । उद्भूतस्पर्शस्येति ॥ अनुद्भूतस्पर्श
स्येत्यर्थः । अतो न परमाणोर्व्यभिचारः । महत्त्वे न हेतुविशेषणमित्यन्ये । न च चक्षुरसंनिकृष्टक्लिन्नेष्वैव व्यभिचारः । अवस्तु योग्यता
या व्याप्यत्वात् । रूपवत्त्वमिति ॥ न च रूपवत्त्वस्यैव चक्षुर्ग्राह्यत्वे प्रयोजकतावच्छेदकतया साध्यव्यापकत्वस्य चानुपाधित्वादिति वाच्यं ॥
रूपवत्त्वस्यैव प्रयोजकतावच्छेदकत्वं । रूपत्वेनास्य व्याप्यत्वात्स्वरूपेणोपाधित्वाविरोधात् । गुणत्वादिति ॥ यद्यपि साधनावच्छिन्नसा
ध्यव्यापकत्वेनायं दोषः । तथाप्युपाधेरप्यापादकत्वे शक्यत्वात् । साधनव्यापकत्वमस्यैवेति भावः । सुखादिकमिति । अथ

ली०व०

ति४

मर्थः। अस्ति च चापरमष्टपुत तद्वस्तु स्पर्शेषु पाकानन्तरं सुकुमारकठिनतरत्नमादिर्वा संवेद्यो लौकिकी। अत्रान्वयव्यतिरेकाभ्यां
तेजःसंयोग एव प्रयोजकः। न चावयवानां निबिडसंयोगः संग्रहाख्य एव तद्विषयः। तस्य द्वीन्द्रियग्राह्यतया चक्षुषापि तद्ग्र र
हापत्तेस्तेन चेष्टापत्तिः। चक्षुषापि तद्ग्रहे पि स्पर्शविशेषग्रहापात्। अन्धकारे पि तत्प्रतीतिः। अवयवसंयोगस्या वयविन्यप्र
३२ तीतेः तद्भूतत्वेन प्रतीतिर्भ्रम एवापत्तेस्तस्मै स्पर्शविशेष एव तद्विषय इति नापीति। पृथिवीस्पर्शस्तेजःसंयोगजन्यः प्रतिनियते
गंधवत् न्द्रियग्राह्यपृथिवीगुणत्वात्। न च वगवेधत्वमुपाधिः। तेजोव विनिसाध्याव्यापकत्वात्। न च साधनावच्छिन्नसाध्यव्या
पकः पक्षेतरत्वात्। न च साधनावच्छिन्नसाध्यव्यापकरूपवदिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्वमुपाधिः। तुल्ययोगक्षेम ३३
त्वात्। न च संदिग्धोपाधिः। उक्तविपक्षे बाधकाद्वातोः साध्यव्यापकत्वेनोपाधेः साध्याव्यापकत्वात्। घटपि पाकज
स्पर्शेनेतरभेदसाधको वयविनि नामासिद्धेः। तथापि मग्निसंयोगासमवायिकारणकवृत्तिगुणत्वात्। व्याप्यव्याप्

पाकजत्व

जातिमत्त्वेतथेतिसंक्षेपः।इत्थंचयापरामृष्टेषुतत्रइत्युक्तस्पर्शेषु।साचेयंयदिपरमाणुरूपैवस्यात्तदागंधोतींद्रियत्वान्नपृ
थिवीत्वव्यवस्थापकइत्योपाद्घातिकसंगत्याह।साचेयमिति॥यद्यप्यवयवत्वंद्रव्यसम।वाइकारणत्वंतदन्यत्वंपरेषां
रेषांपरमाणुजन्यपरमाण्वन्यत्वंवेतिविवादाभावः।नचावयवसमवेतत्वंतत्र।सर्वेपृथिवीपरमाणूक्तरसेपरमाणौतदभा
वात्।तथाप्यवयववृत्तिजातिमत्त्वंतद्विवक्षितं।नत्विति॥नमनोवदणुमात्रवृत्तिजातिमत्त्वमर्थः।अत्रद्रव्यत्वमणुत्वव्या
प्यंनवा।परमाणुस्वावृत्तिनोपादेयोपादानेनचेतिशेषः।स्थूलप्रत्यक्षस्येति॥तदन्यविशेषस्येतिशेषः।अतोनार्थान्तरं।अवय
विसाधकत्वेनप्रत्यक्षस्यैवोपन्यासात्त्रापत्तेश्च मे त्वस्यानुमानदूषकस्याभावः।स्थौल्यंचनानेकद्रव्यवृत्तित्वंद्रव्यगुणेति
प्रसंगात्।किंतुबहुद्रव्यवृत्तिद्रव्यत्वं।अवयविद्वयारब्धेपिपरपर्यायतदस्त्येव।द्रव्यत्वंस्थौल्यसमानाधिकरणंनवेतिसंशयः।
परस्परद्रव्यत्वेनस्वसिद्धिः।परमाणौतदनुपपत्तिमाह।नचाहीति॥एकंस्थूलोयमितिप्रत्यक्षेणपरमाणुविशेषप्रत्यक्ष

नो०५०००

वादात्मप्रत्यक्षत्वदिति साधनार्थः। अतो न परमाणुमात्रपक्षत्वे अंशतः सिद्धसाधनं। न चैकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहप्रत्यक्षसंभवात्।
दूरे एकधान्याप्रत्यक्षत्वेऽपि तद्राशेः प्रत्यक्षत्ववत् तत्रैकधान्यस्य स्वरूपयोग्यत्वात्। अत्र प्रत्येकं तदन्यथात्वात् समूहस्याप्ययोग्यत्वात्
न्न साधनेऽपि विपक्षे बाधकाभावान्न व्याप्तिरित्यत आह। विशिष्टेति॥ तदनभिधानात् विशिष्टस्पर्शो निर्वक्तुमशक्य इति वादित्यर्थः। न च यदेक-
34 त्वं हेतुं दूषयति। द्रव्यत्वादिति॥ ननु न वा द्रव्यविशेषद्व्यणुकस्य द्रव्यजनकत्ववन्मम चाद्रव्यनिर्विकल्पकात्मकं समवेतं तरप्रत्ययस्य द्रव्यस- 34
विकल्पकजनकत्ववत् द्रव्यविशेषस्यैव द्रव्यजनकत्वमस्त्वित्याह। केशादिदेवेति॥ परमाणुत्वस्यातीन्द्रियत्वे स्वरूपविशेषः साध्या-
व्यापकत्वान्नोपाधिरित्याह। अदृष्टरूपस्येति॥ उक्तयुक्तिमेव युक्त्यन्तराभिधानार्थमनुवदति॥ स्थूलेति॥ एक इति॥ नन्वेकस्थूल इति ज्ञान-
मसत्ख्यातिः समूहस्याप्येकस्यकाप्यसिद्धेः। एको धान्यराशिरिति ज्ञानवत्तथापि भ्रमरूपमेवेदं वाच्यं। अवयवीवियदविसमूहस्याने- ह
कत्वात्। अत आहुः॥ ॥ न च समूहालंबने ज्ञाने एकत्वमस्तीति नासत्ख्यातिः। बाधकस्यानिराकरिष्यमाणत्वात्। मम चावयवावयविषस-
मूहेष्वेकोऽवयवी च। स्थूलोऽस्ति न चाभिमते परमाणावितिविशेषमात्रं। यथानुभवं यथा निर्विकल्पकं निष्प्रपंचं सविकल्पकं तस्यैवानि

तत्र समूह भिन्ने २

श्वा२ त्रिर२ ति आ२

विकल्पात्मकव्यवस्थापकत्वादित्यर्थः॥ अनाहत्यहं त्ववयवी पद्यात्मकत्वे स्यादनाहत्य त्वतिर्नस्यादित्यादयश्च कोऽयमसिद्धिविपर्यय या

र्यवसानात्तदुक्तं इति स्फुरतयाऽपेक्षानुपर्दहः॥ अद्भुविरणेति॥ अवयवीनींद्रियसंबद्धेत संबंधविच्छेदकत्वेन दृश्यमानत्वादित्यर्थः॥

व३ अयं विग्रहे यदि अवयवींद्रियसन्निकर्षो हेतुः स्यात्तदा परमाणुमात्रानंतरितस्याप्यवयविनो ग्रहापत्तिरिंद्रियसंबंधे न तद्विशेषमित्याह॥॥

नञ् सूर्ययोवयवेति॥ तत्र सूर्यस्वपदियावत्त्वं तदाप्यवहितकिंचिदवयवस्यापि अवयविनोनग्रहस्याद॥ चक्षुश्चमात्रस्यतत्सेनानास्थानेपरमा

णुमात्रानंतरितोप्यवयवी गृह्येत॥॥ अत्राहुः॥ तादृशावरकद्रव्यमेव तत्रावयविग्रहप्रतिबंधकं कारणांतरविलंबेन कार्यमनुत्पत्तौ कार

णत्वस्यापत्तेरूहात्॥ पूर्वस्थैल्यपदेन महत्त्वपरिमाणमुक्तं॥ अणुनादौ चैवमाह॥ द्विहस्तेति॥ नेत्वनावरणस्य शावत्र द्विहस्तत्वादिजातिमत्व

रिमाणविशिष्टस्यावयविनो ग्रहणप्रसंग इत्याह॥ अवयविरूपेति॥ अवयविग्रहे तत्परिमाणग्रहे च तत्कृतजातिविशेषस्यतावद्यैव ग्रहव्यंग्यत

यातस्मादेवाग्रह इत्याह॥ द्विहस्तेति॥ नन्वेवं चुकंपमानेष्ववयवीयद्यकंपः तदा किंचिदवयवावच्छेदेन तत्र कंपो नोपलभ्येत॥ अथास

कंपते तदा प्रदेशांतरेप्यकंपो नोपलभ्येत अकंपोपि सकं कर्तव्य इति विरोध इत्याह॥ अकंपेति॥ अवयविकंपस्य सकलावयवकंपनियतत्वात्॥

लौ॰वं॰

च॰ स॰ च॰ ब

क्वचिदप्यवयवे कंपेप्यवयविनी निष्कंप एवेत्याह। आगतागतेनेरिति॥ न च संयोगवत्कर्माव्याप्यवृत्तिर्भवतीति वाच्यं। अवयविनि यथोक्तेनैवोपपत्तेः॥

अवयवेषु सकलावच्छेदेनैव कर्मोपलंभात्। ननु वस्त्रोदकवद्वर्न्नाचलनयोरवयवावयविनोर्युतसिद्ध्यापत्तिरित्याह। चलाचलयोरिति॥

परस्परगुणगुणिनोरभेदादेव न व्यभिचारः। नित्येति॥ यद्यपि बाधस्थलेऽनुगुण एव तथापि विद्यमानयोरेव संबंधे साध्ये नित्यसंबंधाभावव

३५ पाधिरित्युक्तं भवति। वस्तुतो गुणगुणिनोरभेदसिद्धौ रूपादौ व्यभिचार इति भावः। अनित्येति॥ यद्यपि नित्यसंबंधो बौद्धस्य परस्य तोऽसि

द्धस्तथापि पराभिमतः नित्यसंबंधाभाव एव तेनापाद्यते। तेन पूर्वोक्तोपाधौ साधनव्यापकत्वमुक्तं भवति। ननु वायौ यथा न निष्कंपः संयोगवि च ३५

भागयोरेव कंपव्याघातयोस्तत्र प्रत्यक्षासिद्धत्वादित्याह। अक्रांतदेशभेदेनेति॥ पार्श्वे पाणिस्थो नागांत्तरे न्यस्य नाभिनीत्यर्थः। आक्रांत

देशाभूतलादिभेदेनैकस्मिन्नेकेन चित्संयोगेऽपि केन चिन्न तदभावो विरुद्धमित्याह। आक्रांतदेशभेदेनेति॥ एकत्र संयोगतदभावयोर्व्या

विरोधं वक्ष्याम इति भावः। विरोध इति॥ निरूप्यते नेनेति विरोधो विरुद्धधर्माध्यासः। अवच्छेदकत्वं विशेषणत्वं च न संयोगतदभावयोर्व्या

धं॰

अयेकैकवृत्तिविशेषवत्त्वात्सिद्धेरिति॥अभावस्य समवायेन निषेधात् संयोगात्यंताभावस्य वा जन्यत्वादित्यर्थः॥ज्ञानस्येति॥संयोगतदभाव
विषयकस्येत्यर्थः।अनुज्ञानस्याजयनिरूपत्वं नवत्थांतिस्यत्याह।किंचिदेवेति॥तुल्यमिति दर्शनस्यान्यत्राविशेषदर्शनः एकेनेति॥आश्र
येत्यर्थः।कुतो विशेषात्संयोगात्यंताभावः प्रतियोगिसमानाश्रयो न रूपाद्यत्यंताभाव इत्याह।सर्वेषामिति॥रूपाद्यभावानामित्यर्थः।अभावस्य
विशेषेपि यथा कश्चिदन्योन्याभावः कश्चित्संसर्गाभावः।तथा प्रतियोगिभेदादेवात्रापि व्यवस्थेत्याह।वैचित्र्यादिति॥मुनिनिमादे
रिति॥कालिंदीजलादाविति शेषः।औपाधिकमिति॥संसृष्टपृथिवीरूपाश्रयोपाधिकमित्यर्थः॥चंद्रमसीति॥यद्यपि चंद्रकिरणानां
अनुद्भूतस्पर्शतया शैत्यं नानुभूयते।तथाप्यागमाच्चंद्रमंडले शैत्यं प्रतीयत इति भावः।तैजस इति॥यद्यपि रश्मिधर्मस्य निष्ठतया भास्वतैज
पाधिः।यथा जपापुष्पं स्फटिक इति।तिर्ह्र एवोपाधिस्तथापि योन्यधर्मोन्यगतत्वेन प्रतीयते।स उपाधिरिति मतमाश्रित्यैवमिदमौपा

थिरुक्तः॥ घटादाविति॥ नीलिमवतीति शेषः। विचित्रस्वभाववाद्वस्तूनां क्वचिदनित्यत्वेपि क्वचिदनित्यत्वं स्यादित्याह। पित्रेति॥
स्फटिकेति॥ जपापुष्पसंनिधौ स्फटिकस्येव तस्यापि नित्यवद् तत्रापि नीलिमा नित्यत्वादित्यर्थः। दोषानां करस्थगतत्वविशयगतत्व
देनप्रकारद्वयमुक्तं। नियामकेति॥ जलेरसो नानुभूयत एव यदि च शर्करावन्माधुर्योननुभवेपि तिक्तादिवैलक्षण्यं माधु
र्यं तदा शर्करामाधुर्यवैचर्म्यात्तिक्तत्वमेव रसस्य किं न स्यादित्यर्थः। कचिदिति॥ जलत्वं यदि तिक्तरससमानाधिकरणं
स्यात्तदा ज्ञायाप्तनाविंस्यादतिरिक्तरसासमानाधिकरणं स्यादित्यर्थः। अनुष्णाशीतेति॥ व्यतिरेकमात्रे दृष्टान्तः॥ ननु स्पर्शम
वेपि तात्पर्यं। श्रीअपेति॥ संयुक्तास्मादिरस्पर्शयपार्थिवीयो पाकेती तत्त्वमतानितित्यर्थः। तद्वितरहेनेति॥ अस्मादिव्यतिरेकेणेत्यर्थः।
पाकजेतीयं यद्व्यतिरेकेणापलभ्यते तज्जातीयस्पर्शवत्त्वं पाकजोपाधिकं वैद्यायं दोषादित्याह। पृथिव्यामपीति॥ स्नेहवदिति॥

३६

पि दोषम

त५

तैलादिस्नेहवदित्यर्थः।एतच्चसिद्धान्तिमतमाश्रित्योक्तं।वृत्तेपिदर्शनादित्यनेनाग्नेस्नेहस्यापार्थिवत्वेनापदाचारः।अनुद्भू
तरूपोद्भूतस्पर्शवान्निरिंद्रियंतेजः।स्तदीयस्पर्शवानित्यस्यचेनानुभूयतइत्याह।तैजसमिति॥रूपाभावत्वेति॥एतच्छीतोष्णभिन्न स्पर्श २
स्पर्शस्यानावाग्निस्पर्शोवायुरितिमतमाश्रित्योक्तं।यद्वातैजसत्वेनविशेषणीयं।तदेति॥पक्षिस्थानाविकमोष्णमित्यादिस्त्र
४ नव वस्तुतेजःसंबंधविनेत्यर्थः।यथा[illegible]वृत्तइ[illegible]चेतेजःसंबंधविनाऽनुपपद्यमानमपिगर्भस्थानाविकं।तथाजलस्योष्णमपीत्याह॥
कनकादीति॥स्पर्शपाकजन्यसमानाधिकरणरूपपाकजत्वेव्याप्तिमित्याह।रूपस्येति॥विपक्षेबाधकाभावेनपार्थिवत्व दि
कमित्याह।रूपस्येति॥तादृशावैःपाकजत्वेएवंकनकेरूपापाकजत्वेद्रवत्वमपितथास्यादित्यर्थः।[illegible]श्रीखंडे
शीतस्पर्शोपलभ्यते।नचाहंस्पर्शाश्रयाश्रितत्वानुत्त्वाद्दयामेवस्मइतिवाच्यं।जलसंयोगस्यैवशीतोस्पर्शो

चारीय २३

त्यादकत्वे विरोधाभावात्। अन्यथा वर्षकजलापेक्षया घृतस्य शीततरत्वानुपपत्तेरिति भावः। तैलेपीति॥ पार्थिवेपि
तैले स्वाभाविकं द्रवत्वमिति न तल्लक्षणमित्यर्थः। तत्रेति॥ जलद्रवत्वस्य तथात्वादित्यर्थः। नु पार्थिवे द्रवत्वमग्निसं
योगजन्यमिति न तत्रेत्याह। उक्तयुक्तेरिति॥ उपष्टंभकमाहात्म्यादित्यर्थः। आप्यस्येति॥ संयुक्तसमवाय
तत्सन्निहोपलब्धिरित्यर्थः। समवाये वा ध्वंके सत्येव तथा च भिन्नाभिन्नेभ्य इह। द्रवत्वस्येति॥ ननु किं विद्यते इदं सा
धनदूषणेपि साधनान्तराद् द्रवस्यादित्यत आह। द्वितीति॥ यथा पृथिवीविशेषे सौरत्ने न तन्मात्रे तथा गंधोपि स्या
दित्याह। नियतेति॥ नेदं प्रतिपादकेति॥ अन्त्यजातेरभावात्। करकासाधारणानुगतमतेरभावात्। न च विल
यनदशायां तत्रापि तत्प्रतीतिः। विलीनरूपकस्य करकातो द्रव्यान्तरत्वात्। न च शीतस्पर्शात्तत्र जलत्वानुमानं॥ सं

क्षत्राणुक्त२ त्वि२ रु९ वृत्ति२ बाव२

सिद्धिकइवा नावेन ततत्वक्षतिरो भावात्। नापि स्नेहे समवाइकारणतावच्छेदकं जलावयविनि तत्सिद्धौ जलपरमाणौ
सो पादियैस्व्यद्भत्रिइव्यवसा द्याद्याप्यजोमत्वमनुमेयं स्नेहत्वस्य कार्यैकार्येष्टत्वितयाकार्यता नवच्छेदकत्वात्। नापि स्नेहत्वमात्र
द [illegible] त्रिसंयोगी समवाइकारणतयानसिद्धिः। स्पर्शवन्मात्रे संयोगसमवाइकारणतयापि जात्यापत्तेरितिभावः। शुक्लमेवेति॥
नवस्य[illegible]टिकेति व्याप्तिः। अपाकजत्वेन विशेषणेपि पार्थिवावयविनि व्यभिचार इति वाच्यो। अत्रास्वरशुक्लरूपत्तित्वरूपस्य प्र
नाधिकरणद्रव्यत्वव्याप्यजात्यनाधारत्वे सति रूपवत्त्वस्य विवक्षितत्वात्। व्योमवृत्ति[illegible]द्विमकालिंदीजलनीलिमभूस्तेजोद्रूप
णानिलवइतिदूषयति। नचेति॥ अत्र सूर्यालोकेन नीलं रूपं नाभिव्यज्यत इति विशेषव्याप्तिः। प्रदीपप्रभया नीलोत्पल
नीलिम्नो[illegible]त्वात्। सामान्यतो व्यभिचारात्। ननु विशेषव्याप्तावप्यस्त्वेवसमुपाधिः। साध्याव्यापकत्वादित्याह।
नचेति॥ सोपीति॥ नचराकरोयोव्यभिचारः। अपाकजत्वेनपूर्वोक्तविशेषणादिति वाच्यं। मधुरेतररसजित्वरस[illegible]धिकरण

२९ व९

द्रव्यत्वव्याप्यजात्यनाधारत्वे सति रसवत्त्वस्य विवक्षितत्वात्तत्र योग्यानुपलब्धिबाधं निरस्यति। कषायेति। नन्वेवं रूपाद्यव्यंजकत्वे सति रसव्यंज
कत्वं रसनाग्राह्यसाधकं कषायद्रव्य एव व्यभिचरेत्। न च स्वीयरूपव्यंजकत्वात्तत्र हेत्वभावः सक्तुरसाभिव्यंजकोदकस्यापि स्वीयरूप
व्यंजकत्वादिष्टत्वाच्चास्य साध्यवत्त्वे विकल्पापत्तेः। परैर्रूपाव्यंजकत्वं तत्रापि समानं। न च कषायद्रव्यं जलस्यैव तादृशं मधुररसस्य सक
लजलसाधारण्यापत्तेः। कर्कटीभक्षणानंतरं जलपाने तिक्तरसस्यानुभवात्तत्र तिक्तरसस्योत्पत्तेः। अत आह॥ ॥रसनाग्राह्यरसा
संघके पार्थिवरसाभिव्यंजकत्वं साधनमतो न जलरसव्यंजककषायद्रव्ये न व्यभिचारः। कषायद्रव्यान्यत्वे वा हेतुविशेषणं। तिक्त
रसस्य कर्कट्या एव केवलं कर्कटीफलेऽपि तिक्ततोपलंभात्। तदेकदेशे तिक्ततासिद्धेः। अवयवसजातीयस्यावयविनि सत्त्वेः। यद्वा
कर्कटीभक्षणेन रसनायां वर्त्तिपित्तदोषः क्रियते तदीयतिक्तत्वं तत्रोपकल्पत इति वैद्यकादवगतं। अत एव जलपानं विनापि
तत्र तिक्ततोपलंभः। तत्र मधुरा हरीतकी त्वनुभावात्तदीय एव मधुररसोऽनुभूयते। न जलस्येत्यपि नास्ति। स्वरूपयोग्य

हरीतकीरसांतराणामपि रसेनैव संयुक्तसमवायाविशेषात्प्रत्यक्षापत्तेः। सामग्रीसत्वेपि कार्याभावस्य व्याहतत्वादित्याह। नचेति॥ एतच्च हरीतक्य
वयवानां नानारसत्वमभ्युपेत्योक्तं॥ ननु हरीतक्यामेवाव्याप्यवृत्तिनानारससमवायः व्याप्यवृत्तिजातीयताविरोधात्। नच षड्रसा हरीतकी
ति व्यवहारात्तत्र चित्र एव रसः। गुणविरोधे न नानारसैरवयविनि रसानामारंभात्। चित्ररूपावयविनि तु नीलरूपत्वेनाप्रत्यक्षतापत्तेर
नन्यगतिकतया तथा स्वीकारात्। विजातीयरूपासहकृतस्यैव नीलादेर्नीलाद्यारंभकत्वे वा बाधकाभावात्॥ रसस्य नन्यपदव्याप्याह
कत्वात्। षड्रसत्वव्यवहारस्य च तत्तद्रसफलजनकत्वेनैवोपपत्तेरित्याशयात्। ननु मधुररसमात्राभिव्यक्तद्रव्यांतरोत्पादे हि तत्तद्रसोत्पत्तौ
रसांतराणामभिव्यक्तत्वाद्दानोक्तदोषइत्याशयेनाह। नचेति॥ द्रव्यांतरे तावन्मात्रावः हरीतकीरसपाकजत्वस्य त्वापसिद्धांतः। परमाणुर
सस्यैव पाकजत्वात् कारणगुणप्रक्रमेण तदुत्पत्तेः अवयवानां नानारसत्वाद्गुणविरोधेन तदनारंभाच्चावयवीनीरस एवेत्युक्त
मतस्तेजसैव नैमधुररसारंभकत्वाभावात् तदवयवगतविजातीयरसाभ्युपगमे प्रत्यक्षापत्तिरित्यभिप्रेत्याह। पृथिव्यामिति॥ नचु
हरीतकीति॥ हरीतकीत्वाद्यः स्वादवयवावयवपरस्य एतन्मते वैषां रसानां संयोग चेपि ज्वलविशेषमनभिप्रेत्योक्ते। तथा चेतररस

त्र२ नू२ तं२ ना४
त्रल१

स०१

तेन मधुररसस्य जलानभिव्यंग्यमनुमेयमिति भावः। अव्यापिकषायद्रव्यस्यापीत्यर्थः। आरदेति॥ ननु रसांतराप्रतीतिमात्रं तत्रानुमाधुर्यो
नुभवः न च नीरसत्वे सौहित्यार्थिनः तत्रप्रवृत्त्यनुपपत्तिः। अंतःसौहित्यार्थिनो तदुपपत्तेः। नीरसपवनजद्वतेपि सर्पाणां प्रवृत्तेश्च। नि[illegible]म च
नुष्णाणांनीरसजलचर्वणेप्रवृत्तिरिति व्याप्तिः तावता रसमात्रसिद्धावपि मधुररसासिद्धेः। तस्मात्पूर्वोक्तमानावष्टंभेनेदमुक्तं निर्यत्न का
ना वाधितिदूषयति। किंचेति॥ अनुभूयमानेति॥ अम्लरसएव यथा जातिरनुभूयते तद्विरहइत्यर्थः। एकजातीयत्वगुणाच्च व्याप्य[illegible]जाता।
अन्यथेति॥ अवांतरजात्यनुभवव्याप्तो न परस्तात्स्पृतुभवइति भावः। पृथिव्यामपि मधुरतायाः आप्यत्वापत्ति[illegible]दूषयति। न च पृथि
व्यादिति॥ एकजातीयत्वगुणाच्च व्याप्य[illegible]। अ[illegible]येति॥ अवांतर[illegible]जात्यनुभवव्याप्तो न पर[illegible]अनुभवइति भावः। पृथिव्या अप्यपिम
धुरतायाः आप्यत्वापत्तिरितुक्तं दूषयति। न च पृथिव्यादिति। औपाधिकस्यापाध्यपकर्षेऽपकर्षोपलंभनियमादित्यर्थः। प्रस्तुत[illegible]ति
जलामगमे माधुर्योत्कर्षादिति भावः। इह प्रतिबंदिं दूषयति। उष्णेति॥ यथा यथा घृतादौ षोडशपास्ते हापकर्षोपलंभो हेपा

धिकत्वत्वस्नेहत्वादित्यर्थः। औपाधिकत्वादिति॥ उपाध्यन्वयाधीनविधानुस्यानन्यथासिद्धत्वादित्यर्थः। श्रीखण्डक्षोदेनवर्षकजलस्येव प्र
कृष्टसौरभ्यमभिव्यज्यते। यद्वा। श्रीखण्डान्तरसंनिकृष्टजलस्यैवेतरेषां हि न तस्य सौरभ्यातिशय उपलभ्यते। अथ च श्रीखण्डस्पर्शो विजातीयस्पर्शा
नुभवात्। पवनादेर्दृष्टान्तरसौरभ्याभिव्यञ्जकत्वदर्शनाच्च। इत्यन्तरापृथिवीत्वेत्यात्पादस्यकापत्तेनादितिभावः। रूपा [illegible] व्याप्य
मन्वाद्यस्य। शौक्ल्यत्तापाद इति अत्र व्यभिचारं इत्याह। भेदस्येति॥ करकादावजावादितिदूषयति। आपाद [illegible] स्येति। तेजःसंबन्धेनापि इव
चार्शनाच्च। अत्युष्णत्वात्सोपलेनातत्पाकजत्वादित्यर्थः। न च हि मोपि उष्ण्याग्निसंयोगे विलयनादत्र बाधः। अपाकजत्वेपि निमित्तान्तर
तैनउत्पत्तिः कथं निराकरणीयेति वाच्यं। नैमित्तिकद्रवत्वस्य तेजःसंयोगजन्यत्वनियमात्। यत्नातीयपरमाणुसंयोगजन्य

न्यद्रवत्वाश्रयः तज्जातीयेन तदभावे पिंडीभूतमुपलभ्यते। तथा घृतादीनि तद्दृष्टिमिष्ट। जलजातीयानि तथा च वाराकरकादीनि तत्स्पर्श
वत्त्वेन जलत्वानुमानं। न चासांसिद्धिकद्रवत्वेन प्रतिरोधः। तस्यासिद्धेः। अदृष्टविशेषात्प्रतिबंधे काठिन्योपलंभादिति
४० भावः। तस्येति॥ आप्यद्रवत्वस्यैवेति संयोगाजन्यत्वादित्युक्तत्वादित्युक्तत्वमिति भावः। तत्र पक्षे वैधर्म्यमिति दूषयति तैजसे ४०
ति॥ स्नेहप्रकर्षाभावस्तत्रोपाधिरिति भावः। तैलद्रवत्वस्य पार्थिवत्वे च बाधकमाह। घृतेति। तैलद्रवत्वस्य पार्थिवत्वे चेत्तद्द्रवत्वं पाकजं नैमि
त्तापत्तिरित्यर्थः। एवं चेति। तद्द्रवत्वस्य पाकजत्वादापद्रवत्वस्य चातथात्वान्न द्रवत्वप्रतिबंधीति घृते स्नेहलोपापत्तिः सिद्धस्नेहे तत्र स्नेहप्रक
र्षसिद्धमित्यर्थः। नोमेति॥ न चैवं घनत्वं मिलितं वा तद्द्वापुनानैकांतिके। न चानलदाहत्वेन तद्विशेषणं दाहे हि तस्मिन्नभावो वा रूप
पयादृवेर्वोत तत्स्यापि स्नेहादन्तरपक्षत्वमेवं। अनवद्रवनानलनाशहेतुनाशप्रतियोगित्वे सत्यनलहेतुत्वमिति घनत्वं। अ
नि

नन्वेवं लोकशास्त्रयोः सुवर्णपदस्य भिन्नार्थत्वे कथं सकृदुच्चरितात् ततोऽर्थद्वयधीरित्यत आह · चस्त्वभेद
इति ॥ मधुरोऽद्य निरसा वित्यत्रेवावृत्त्या अर्थद्वयधीरित्यर्थः ॥ तर्हि तेजोरूपाद्यप्रतीतिः कुत इत्यत आह · भूसंस
र्गेति · उपष्टंभकपार्थिवसंसर्गादित्यर्थः ॥ नवकनकरूपं चेत्यादिना पीतरूपेण तेनाभिभवोऽभिभानादनेन प्रतिबं
धाभिधानात् · अभौमं · तैजसमित्यर्थः ॥ यद्यपि भौममपि गुरुत्वं नात्यन्ताग्निसंयोगादुच्छिद्यते · भस्मदशायामपि किंचिद्गुरु
त्वानुभवात् · तथाप्यभ्युपगमवादोऽयं · सुवर्णद्रवत्वमपि काठिन्यवदेव नष्टं पुनरुत्पद्यते इति न विनाशकसत्त्व
कल्पितस्याध्यक्षत्वादित्यत आह · नवेति ॥ तदा कनकद्रवदशायां तेजोरूपेण · अग्निरूपेणेत्यर्थः ॥ तर्हि द्रवदशा
यां यादृशं तद्रूपमासीत् तादृशं पुनः कथमुपलभ्यत इत्यत आह · प्राक्तेति · अत्राप्यतिशयेन ज्ञानं विवक्षि
तं ॥ अग्निसंयोगाभावस्य रूपान्तराहेतुत्वात् · अग्निसंयोगस्यैव तद्धेतुत्वात् · तथाचौषधाद्विचकादृष्टादितदाह

ष

४३ स्यदेहस्य तन्नाशे यथा पश्चात् प्राकृतं रूपं ज्ञायते तथाग्निसंयोगस्य प्राकृतरूपज्ञानप्रतिबंधकस्य नाशात् ०
प्राकृतं रूपं ज्ञायत इत्यर्थः ॥ औषधाभावादिति पाठे दाहप्रतिबंधकौषधाभावात् ० आसादितदाहस्य देहस्येत्यर्थः ०
अत्र वदंति ० अत्यंताग्निसंयोगानुच्छेद्यद्रवत्वमसिद्धं घृतादिद्रवत्ववत्तारतम्यदर्शनेन द्रवत्वोच्छेदात्तनुपष्ट
म्भकपार्थिवे च व्यभिचारः । न हि तत्र तद् द्रवमेवास्ति ० तैजसत्वसाधने जलपरमाणुभिर्व्यभिचारो साधारण्यं च ०
न च द्रुततैजसत्वे साध्ये सपक्षाभावादसाधारण्यं ० अर्थांतरत्वात् ० तैजसत्वमात्रे विप्रतिपत्तेः ० उपष्टंभकाभोग
विरुद्धत्वाच्च ० द्रुतपार्थिवत्वस्यापि तत्र साध्यतापत्तेश्च ० व्यतिरेकव्याप्तेरविशेषात् ० अंशतः सिद्धसाधनाच्च ० द्रवत्व
स्योभयसिद्धत्वात् ० अत्यंतानुच्छेद्यपदार्थानिरुक्तेश्च साध्याप्रसिद्धिश्च ० न च तेजो द्रवत्ववत्तद्रूपवत्त्वादिति तत्
सिद्धिः ॥ घटादौ व्यभिचारात् प्रसिद्धतेजःपक्षत्वे बाधादन्यत्राप्रसिद्धेः ॥ तेजस्त्वे द्रवत्ववद्वृत्ति द्रवत्वसाक्षाद्व्याप्यरू ४३

पवद्इति·जातित्वात्·जलत्ववदित्यत्रचरसवद्वृत्तित्वमुपाधिः·नचरसवत्वंद्रवत्वसमानाधिकरणात्यंताभावप्र
तियोगि·अद्रुतवृत्तिद्रवत्वव्याप्यधर्मत्वात्·घटत्ववदितिद्रुततेजःसिद्धोसाध्याव्यापकत्वं·तेजोमात्रावृत्तित्वस्योपाधित्वा
त्·नचपक्षेतरत्वं·प्रदीपत्वादेरपिव्यावर्त्यत्वात्·अतएवेदमपार्थिवं अत्यंताग्निसंयोगानुच्छिद्यमानद्रवत्वा
धिकरणत्वात्जलपरमाणुवदितिनानुमानं·अप्रसिद्धेः।उपष्टंभकभागेव्यभिचाराच्च।द्रवत्वावच्छेदका
ग्निसंयोगवत्त्वंचघटादावनैकांतिकं·सुवर्णारंभकाश्चपरमाणवो·नपार्थिवाश्च अत्यंताग्निसंयोगेपिभस्मानारंभ
कत्वादित्यपिघटादौव्यभिचारात्·परमाणुत्वेनविशेषणत्वेसिद्धिश्च तैरपिकदाचिद्भस्मारंभाभ्युपगमात्·किं
चसुवर्णंपार्थिवं अग्निसंयोगासंभवाधिकरणकद्रवत्वाधिकरणत्वात्इतिद्रवत्वसाक्षाद्व्याप्यजातिमत्वात्·घृतवदि
तिप्रतिरोधोपि·नचतेजोनैमित्तिकद्रवत्वसमानाधिकरणतेजस्त्वदितरावृत्तिजातिमत्वात्·शीतस्पर्श

सुवर्णंतैजसं॰ सुवर्णंतेजोवृत्तिसंयोगवत्वात्॰ आलोकवदित्ययिनापि॰ अतेजस सुवर्णसंयोगवत्वेन प्रतिरोधात्—२

सहचररूपवत्वात्॰ पृथिवीवदिति॰ तेजसि नैमित्तिकद्रवत्वसिद्धिः॰ पृथिवीलक्ष्योपाधित्वात्॰ न च पृथिवी
त्वं नैमित्तिकद्रवत्वसमानाधिकरणात्यंताभावप्रतियोगि॰ गंधवन्निर्गंधवृत्यन्यजातित्वात्॰ जलत्व
वदिति पृथिवीभिन्ने नैमित्तिकद्रवत्वसिद्धिः। सकलगंधवद्वृत्तित्वेन प्रतिरोधात्॰ सुवर्णंतैजसं
सुवर्णाभिन्नतेजोभिन्नवृत्तिः॰ समस्ततेजोवृत्तिवृत्त्यात्॰ द्रव्यत्ववदित्यत्रैव तेजोभिन्नद्रव्यवृत्तित्वमु
पाधिः। यत्तु पार्थिवरूपमत्यंताग्निसंयोगादसति विरोध्यंतरे परावर्तते स तिष्ठनेति नियमः॰ दृश्यमा
नेषु पटादिषु दर्शनेन जलसंबंधात् तैलवादर्शनेन कार्यकारणताव्यवस्थितेः। अतः पार्थिवपीतिम
रूपपरावृत्तिप्रतिबंधकतेजः सुवर्णमित्युच्यते॰ तद्रूपापरावृत्तिर्वा विना शः अप्रसिद्धेश्च। तादृशते
जःसंयोगेन एवद्रव्यनाशे रूपनाशस्यावश्यकत्वात्॰ नापि सजातीयरूपानुवृत्तिः सतानाविच्छेदवा॥ ४४

पार्थिवावयविनिव्यभिचारात्‌· पृथिव्यामपितयोर्वैद्गुण्यउपलंभात्‌· पृथिवीचैवधर्म्यवत्तेजोवैधर्म्य
स्या प्यप्रकाशकत्वादभावात्‌· किंचपार्थिवत्वेसाध्ये अग्निसंयोगाविनाश्यरूपाधिकरणत्वमनेकांति
कम् सिद्धंचात्यंताग्निसंयोगनाश्यरूपाधिकरणाच्चेति· पृथिवीत्वव्याप्यजातिशून्यत्वंचपार्थिवपर
माणौव्यभिचारि· तत्रपृथिवीत्वव्याप्यजात्यनंगीकारात्‌॰ अत्यंताग्निसंयोगजन्यरूपाधारत्व
तिन्नातिमत्वंचासिद्धं· दाहेनरक्ते रतादर्शनात्‌· तादृशरूपमभिभावकस्येत्यत्रमानाभावात्‌॰ अत्रो
च्यते॰ विरोधाध्यासितंद्रवत्वाधिकरणं· तैजसे· असतिविरोधिद्रवद्रव्यसंबंधेऽत्यंताग्निसंयोगा
नुच्छिद्यमानद्रवत्वाधिकरणत्वात्‌॰ यन्नैवंतन्नैवंयथाघृतं· नचासिद्धिः· घृतादिद्रवत्वोच्छेदक
त्वेसमानाधिकरणद्रवत्वसामग्रीसमवधानंनास्तिसुवर्णेबस्ति· एवंचसमानाधिकरणद्रवत्वसामग्र्या

४५ समवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रवत्वव्याप्यजातिमत्वरूपवत्वे हेतुः४ उपष्टंभके च नद्रवत्वे·
पार्थिवद्रवत्वस्यात्यन्ताग्निसंयोगेनोच्छेदापत्त्याबाधके नद्रुतप्रतीतेर्भ्रमत्वात्· नचैवेपीतिमगुरुत्वाप्र
पकाठिन्योपलंभापत्तिः४ जलमध्यस्थितमसीक्षोदादेरिवद्रवद्रव्यसंबंधेनतस्यप्रसिद्धिस्तत्संयो
गवत्वात्· जेलपरमाणावनानित्यंद्रवत्वं·नवासाधारणं· अगृह्यमाणविशेषैश्चायंतस्यदो द
षत्वात्· तथाहि· साध्याभाववद्वृत्तित्वस्यैवसाध्यवत्व्यावृत्तत्वरूपापिसत्वात्· सत्प्र
तिपक्षोत्थापकंतस्यदोषत्वं· नयसाध्याभावसाधकस्यपृथिवीत्वपर्यवसायिनस्तुल्यबल
त्वं· अनुकूलतर्काभावेनाग्निसंयोगाद्द्रवत्वोच्छेदात्मकप्रतिकूलतर्केणायतस्यहीनबल ४५

त्वात्॰ तेजस्त्वसाधकस्यचानुकूलतर्कप्रतिकूलतर्काभावाभ्यां अधिकबलत्वात्॰ यदापिसंशा
यकत्वेनासाधारणत्वं तदापि विशेषादर्शनसहकृतस्य तस्य तथात्वं॰ प्रकृते चोक्ततर्कस्य
६ विशेषदर्शनस्यसत्वात्तैभावात्॰ किंचपीतिमगुरुत्वाश्रयोद्रव्यं॰ यद्यत्यंताग्निसंयोगिपार्थिव
त्वेसति विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तं नस्यात्॰ पूर्वरूपविजातीयरूपवत्स्याद
ग्निसंबद्धपटवद्वृत्ति स्थिते प्रयोग४॰ अत्यंताग्निसंयोगेपीतिमाश्रयो॰ विजातीयरूपप्रतिबंध
कद्रवद्रव्यसंयुक्तः॰ प्रवाहपर्यंतमग्निसंयोगसत्ति पूर्वरूपविजातीयरूपानाधारपार्थिवत्वात्॰
जलमध्यस्थितपीतपटवत्॰ नचाप्रयोजकत्वं॰ विरोधिद्रवद्रव्यसंबंधं विना पार्थिवेत्यंताग्निसंयो
गस्यपूर्वरूपविजातीयरूपजनकत्वात्तदित्यस्माकैपेत्लकीरा द्वातस्मरात्४॥ ॥ ॥नत्वितिः पृथि

व्यभेऽजो भिन्नस्पर्शाधारत्वे किं मानमित्यर्थः॥ अरूपेति• बाह्येंद्रियाप्रत्यक्षत्वस्य साध्यत्वात्तात्मनि व्यभिचारः॥
वै. हेतु आत्मभिन्नत्वेन विशेषणाद्रष्टव्यं॥ ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्• न च साधनाच्छिन्नसाध्यव्यापकं रूपव
४६ त्वमुपाधिः॥ स्पार्शनप्रत्यक्षत्वे तस्याप्रयोजकत्वात्• महत्त्वे सत्युद्भूतस्पर्शवत्त्वस्यैव तंत्रत्वात्•
नतद्भूतरूपवत्त्वे सति गौरवात्• कुष्माण्डादेश्च स्पार्शनप्रत्यक्षत्वान्न व्यभिचारः॥ न च वायोः
प्रत्यक्षत्वे तद्गतसंख्यादिप्रत्यक्षत्वापत्तिः॥ व्यक्तौ व्यभिचारात्• एकत्वमवस्थादिव्यक्तेः संख्याद्यपि त्वचा
ग्रहात्• तज्जातीयवपूत्कारादौ संख्यादेग्रहात्• न च प्रत्यक्षविषयत्वव्यवहितेंद्रियजन्यप्रत्यक्षविषयत्व
मपि नैकरूपावच्छेदे• सति संभवे बाधकाभावे च त्यागायोगात्• तथापि नोद्भूतस्पर्शवत्त्वं तया चेद्रमसि
तदभावात्• नापि जन्येंद्रियक्षे ग्राह्यविशेषगुणावत्वे• कार्यमहत्त्वसमानाधिकरणाविशेषगुणावत्वं वा॥
रसनगतपित्तद्रव्यस्योद्भूतरसस्य• वायूपनीतसुरभिभागस्य प्रत्यक्षत्वापत्तेः• किंतूद्भूतरूपवत्त्वं तथे ४६

तिवेत्·न·नयनगतपित्तद्रव्यस्य प्रत्यक्षत्वापत्तेः॥ अथ वायुः यदि स्पार्शनप्रत्यक्षविषयद्रव्यं स्यादुद्भूत
रूपः स्यात्·नचैवं·तस्मान्न तथा·तादृशद्रव्यस्य रूपज्ञानकत्वनियमादिति चेत्·न·रूपवत्त्वसमवेतद्र
व्यत्वस्य तत्प्रयोजकत्वात्·तादृशप्रत्यक्षविषयत्वस्य रूपज्ञानेनोत्तरभावितया तत्रातंत्रत्वात्·घटादिवच्चक्षुरि
तरेंद्रियग्राह्यद्रव्यं स्यादरूपमचाक्षुषं स्यान्नचैवं·तस्मान्न तथेति·घटस्याप्यस्पार्शनतापत्तेः॥ अत्र कुड्यवल्लति
पक्षिकादौ पूर्वदेशविभागोत्तरदेशसंयोगयोरप्रत्यक्षत्ववल्लतीति धीस्तल्लिंगिका न स्यात्·पूर्वोत्तरदेशयोः प्रभामं
डलयोरनुद्भूतस्पर्शत्वेनाप्रत्यक्षत्वात्·नच पूर्वोत्तरदेशानुपलंभोपलंभाभ्यां तयोरनुमानं·पूर्वोत्तरदेशयोरप्रत्य
क्षत्वेन लिंगासिद्धेश्च·उद्भूतरूपवत्त्वं तत्र प्रयोजकं·अथ शीतो वायुरित्यारोपेण स्पार्शनः॥ विशेष्यस्यायोग्यत्वात्·न
च प्रमायां तथा·सामान्ये बाधकाभावात्·नचानुमानोपनीते वायौ गुणोपनीतस्पर्शस्य मनसारोपश्च·तल्लिंगक
स्पर्शादिवच्चक्षुषाग्रहणात्·शीतस्पर्शस्यातल्लिंगकत्वात्·नच शीतद्रव्योपनायकत्वेनानुमिते वाते मनसा शी

४७ तारोपः ॥ तदा शीतस्पर्शानाश्रयत्वेन प्रमिते तस्मिन् तदनारोपात् नापि स्वप्नविभ्रमवन्मानसोयं भ्रमः बहि
रिंद्रियव्यापारानुविधानादिति मे वा । यथा हि वायुवैधर्म्येण जलेऽवगृहीतस्य शीतस्पर्शस्य वायावारोपः ॥
दिङ्भ्रमादर्वदोषमाहात्म्यात् तथा शीतस्पर्शवायुलिंगत्वारोपाद्वा यवीयत्वानुमानं नयैवं शीतापवायवीय इति
